UTTARA RAMA CHERITRA

BHAVABHUTI

UTTARA RÁMA CHERITRA,

OR

CONTINUATION OF

THE HISTORY OF RÁMA,

A DRAMA,

IN SEVEN ACTS.

BY

BHAVABHÚTI.

With a Commentary,

EXPLANATORY OF THE PRÁKRIT PASSAGES.

PUBLISHED UNDER THE AUTHORITY OF THE COMMITTEE OF PUBLIC INSTRUCTION.

Calcutta:

PRINTED AT THE EDUCATION PRESS, CIRCULAR ROAD; AND SOLD AT THE DEPOSITORY, PATALDANGA.

1831.

॥ उत्तरं रामचरित्रं ॥

श्रीभवभूतिमहाकविविरचितं।

साधारणविद्योद्धर्थकसमाजाधिपतीनामाज्ञया

कलिकाताराजधान्यं इडुकेशनयन्त्रालये

प्राकृतभाषाव्याख्यासहितं

मुद्रितमभूत्।

१८३१

Indawé Pandits

॥ उत्तरं रामचरित्रं॥

॥ नाटकं॥

॥ प्रथमाङ्कः॥

॥ नान्दी ॥

इदं कविभ्यः पूर्व्वेभ्यो नमो वाकं प्रशास्महे;
विन्देम देवतां वाचममृतामात्मनः कलां।

॥ नान्द्यन्ते सूत्रधारः॥

अलमतिविस्तरेण। अद्य खलु भगवतः कालप्रियनाथस्य यात्रायामार्य्यमिश्रान् विज्ञापयामि; एवमत्रभवन्तो विदाङ्कुर्व्वन्तु; अस्ति खलु तत्रभवान् काश्यपः श्रीकण्ठपदलाञ्छनो भवभूतिर्नाम॥

यं ब्रह्माणमियं देवी वाग्वश्येवान्ववर्त्तत,
उत्तरं रामचरित्रं, तत्प्रणीतं प्रयोक्ष्यते।

एषोऽहं कार्य्यवशादायोध्यिकस्तदानीं ततश्च वैदेशिकः संवृत्तः ॥ समन्तादवलोक्य ॥ भोभो, यदा तावदत्रभवतः पौलस्त्यकुलधूमकेतोर्म्महाराजस्य रामस्यायमभिषेकसमयो रात्रिन्दिवमसंहृतानन्दनान्दीकस्तत् किमद्य विश्रान्तवारणानि चत्वरस्थानानि?

॥ प्रविश्य ॥ नटः ॥ समन्तादवलोक्य ॥ भाव, प्रेषितां हि ते स्वगृहान्महाराजेन लङ्कासमरसुहृदो महात्मानः प्लवङ्ग राक्षसाः, समाजोपस्थायिनो नानादिगन्तादागता ब्रह्मर्षयो राजर्षयश्च, यदाराधनायैतावतोदिवसानुत्सवश्चासीत्।

सूत्र। एवमेतत्। संप्रतिहि,

वशिष्ठाधिष्ठिता देव्यो गता राघवमातरः,
अरुन्धतीं पुरस्कृत्य जग्मुर्जामातुराश्रमं।

नटः। वैदेशिकोऽस्मीति पृच्छामि। कः पुनरसौ जामाता।

सूत्र। कन्यां दशरथो राजा शान्तां नाम व्यजीजनत,
अपत्यकृतिकां राज्ञे लोमपादाय यां ददौ।

विभाण्डकसुतस्तामृष्यशृङ्ग उपयेमे, तेन च संप्रतं द्वादश वार्षिकं सत्रमारब्धं, तदनुरोधात् कठोरगर्भामपि बधूं जानकीं विमुच्य, गुरुजनस्तत्र गतइति।

सूत्र। तत्किमनेन; तदेहि राजद्वारमेव स्वजातिसमयेनो पतिष्ठावः।

नटः। तेन हि निरूपयतु राज्ञः सुपरिशुद्धामुपस्थान स्तोत्रपद्धतिं भावः।

सूत्र। मारिष;

सर्व्वथा व्यवहर्त्तव्यं, कुतो ह्यवचनीयता,
यथा स्त्रीणां तथा वाचां साधत्वे दुर्जनोजनः।

नटः। अतिदुर्ज्जन इति वक्तव्यं,

देव्यामपि हि वैदेह्यां सापवादो यतो जनः,

रक्षोगृहे स्थितिर्म्मूलमग्निशुद्धौ त्वनिश्चयः।

सूत्र। यदि पुनरियं किम्वदन्ती महाराजं प्रति स्यात्ततोऽतिकष्टं स्यात्।

नटः। सर्व्वथा ऋषयो देवताश्च श्रेयो विधास्यन्ति इति ॥ परिक्रम्य ॥ भोभोः क्वेदानीं महाराजः ॥ आकर्ण्य ॥ एवं जनाः कथयन्ति;

स्नेहात्सभाजयितुमेत्य दिनान्यमूनि

नीलोत्सवेन जनकोऽद्य गतो विदेहान्;

देव्यास्ततो विमनसः परिसान्त्वनाय,

धर्म्मासनाद्विशति वासगृहं नरेन्द्रः।

॥ इति निष्क्रान्तौ ॥ प्रस्तावना ॥

॥ ततः प्रविशत्यासनोपविष्टो रामः सीता च ॥

रामः। देवि वैदेहि समाश्वसिहि। तएव गुरवो न शक्नुवन्त्यस्मान्वियोक्तुं।

किन्त्वनुष्ठाननित्यत्वात्स्वातन्त्र्यमपकर्षति;

सङ्कटा ह्याहिताग्नीनां प्रत्यवायैर्गृहस्थता।

सीता। जाणामि अज्जउत्त, जाणामि; किन्तु सन्दावआरिणो बन्धुजनविप्पओआ होन्ति। (१)

---

(१)। जानाम्यार्य्यपुत्र जानामि किन्तु सन्तापकारिणो बन्धुजनविप्रयोगा भवन्ति।

राम:। एवमेतत्; एवमेते हि हृदयमर्म्मच्छिद: खल्वमी संसारभावा: येभ्यो वीभत्समाना: संत्यज्य सर्व्वान् कामानरण्ये मनीषिणो विश्रांम्यन्ति ॥

॥ प्रविश्य कञ्चुकी। रामभद्र इत्यर्द्धोक्ते ॥ साशङ्कं ॥ भो महाराज।

राम: ॥ सस्मितं ॥ आर्य्य, ननु रामभद्र; इत्येव मां प्रत्युपचार: शोभते तातपरिजनस्य; तद्यथाभ्यस्तमुच्यतां।

कञ्चुकी। ऋष्यशृङ्गाश्रमादष्टावक्र: प्राप्त:।

सीता। अज्ज; तदो किं विलम्बीअदि। (१)

कञ्चकी। निष्क्रान्त: ॥

॥ प्रविश्य ॥ अष्टावक्र:। स्वस्ति वां।

राम:। आर्य्य अभिवादये; इत आस्यतां।

सीता। णमो णमो दे; अवि कुसलं समग्गस्स मम गुरुजणस्स अज्जाए संताए? (२)

राम:। निर्व्विघ्न: सोमपीथी आवुत्तो मे भगवानृष्यशृङ्ग:; आर्य्या च शान्तेति?

सीता। अह्मे वा सुमरेदि? (३)

---

(१)। तत: किं विलम्ब्यते।

(२)। नमो नमस्ते;ऽपि कुशलं समग्रस्य मम गुरुजनस्यार्य्याया: शान्ताया:।

(३)। अस्मान् वा स्मरति।

अष्टा॥ उपविश्य॥ अयकिं, देवि, भगवान् वशिष्ठस्त्वामाह,

विश्वम्भरा भगवती भवतीमसूत,
राजा प्रजापतिसमो जनकः पिता ते,
तेषां वधूस्त्वमसि, नन्दिनि, पार्थिवानां,
येषां गृहेषु सविता च, गुरुर्व्वयञ्च।

तत्किमन्यदाशास्महे केवलं वीरप्रसवा भूयाः।

रामः। अनुगृहीतोऽस्मि।

लौकिकानां हि साधूनामर्थं वागनुवर्त्तते;
ऋषीणां पुनराद्यानां वाचमर्थोऽनु, धावति।

अष्टा। इदं भगवत्या अरुन्धत्या देवीभिः शान्तया च भूयोभूयः संदिष्टं; यः कश्चिद्गर्भदोहदो भवत्यस्याः सोऽवश्यमचिरात् संपादयितव्यः।

रामः। क्रियते यदेषा कथयति।

अष्टा। ननान्दुः पत्या चाभिहितं ऋष्यशृङ्गेण वत्से कठोरगर्भेति, नानीतासि; वत्सोऽपि रामभद्रस्त्वद्विनोदार्थमेव स्थापितः; तत्पुत्रपूर्णोत्सङ्गामायुष्मतीं द्रक्ष्यामि।

रामः॥ सहर्षस्मितं॥ तथास्तु, आर्य्य; भगवता वशिष्ठेन पुनः किञ्चिदादिष्टोऽस्मि?

अष्टा। श्रूयतां।

जामातृयज्ञेन वयं निरुद्धास्त्वं बालएवासि, नवञ्च राज्यं,
युक्तः प्रजानामनुरञ्जने स्यास्तस्माद्यशो यत्परमं धनं वः;

रामः। यथाह भगवान् मैत्रावरुणिः;

स्नेहं, दयाञ्च, सौख्यञ्च, यदि वा जानकीमपि,
आराधनाय लोकानां, मुञ्चतो नास्ति मे व्यथा।

सीता। अदो ज्जेव्व राहवकुलधुरन्धरो अज्जउत्तो।(१)

रामः। कः कोऽत्र भो! विश्राम्यतामष्टावक्रः।

अष्टा॥ उत्थाय परिक्रम्य च॥ अये, कुमारलक्ष्मणः प्राप्तः।

॥ इति निष्क्रान्तः॥

॥ प्रविश्य॥ लक्ष्मणः। जयति जयति आर्य्यः। आर्य्य, तेन चित्रकारेणास्मदुपदिष्टमस्यां वीथ्यामार्य्यचरितमभिलिखितं; तत्पश्यत्वार्य्यः।

रामः। जानासि, वत्स, दुर्म्मनायमानां देवीं विनोदयितुं, तत्कियन्तमवधिं यावत्?

लक्ष्म। यावदार्य्याया हुताशने विशुद्धिः।

रामः। शान्तं;

उत्पत्तिपरिपूतायाः किमस्याः पावनान्तरैः;
तीर्थोदकञ्च, वह्निश्च, नान्यतः शुद्धिमर्हतः।

लक्ष्म। देवि, देवयजनसम्भवे सीते प्रसीद; एष ते जीविताबधिः प्रणामः।

रामः। कष्टो जनः कुलधनैरनुरञ्जनीय
स्तन्मे दुरुक्तमशिवं, नहि तत् क्षमं ते।

---

(१)। अतएव राघवकुलधुरन्धरआर्य्यपुत्रः।

नैसर्गिकी सुरभिणः कुसुमस्य सिद्धा,
मूर्द्धि स्थितिर्न चरणैरवताडनानि।

सीता। भोदु, अज्जउत्त, भोदु, एहि; पेक्खह्म दाव दे चरिदं(१)।

॥ इत्युत्थाय परिक्रामति ॥

लक्ष्म। इदं तावदालेख्यं।

सीता॥ निर्व्वर्ण्य॥ के दाणिं एदे उअरि णिरन्तरट्ठिदा उअत्तुणन्ति विअ अज्जउत्तं(२)?

लक्ष्म। देवि, एतानि सरहस्यजृम्भकास्त्राणि, यानि भगवतः कृशाश्वात् कौशिकमृषिं विश्वस्य मित्रं विश्वामित्रमुपसंक्रान्तानि, तेन च ताडकावधे प्रसादीकृतान्यार्य्यस्य।

रामः। वन्दस्व, देवि, दिव्यास्त्राणि।

ब्रह्मादयो ब्रह्महिताय तप्त्वा परःसहस्राः शरदस्तपांसि,
एतान्यपश्यन् गुरवः पुराणास्तान्येव तेजांसि तपोमयानि।

सीता। णमो णमो एदाणम्।(३)।

रामः। सर्व्वथेदानीं त्वत्प्रसूतिमुपस्थास्यन्ति।

---

(१)। भवतु,आर्य्यपुत्र,भवतु; एहि,प्रेक्षावहे तावत्ते चरितं।

(२)। के इदानीमेते उपरि निरन्तरस्थिता उपस्तुवन्तीवार्य्यपुत्रं।

(३)। नमो नम एतेभ्यः।

सीता। अणुगिहीदह्मि। (१)।

लक्ष्म। एष मिथिलावृत्तान्तः।

सीता। अह्महे, दलन्तवणीलुप्पलसामलसिणिद्धमसिणसोहमाणमंसलेण देहसोहग्गेण, विह्मअत्थिमिदताददीसन्तसुन्दरसिरी अणादरखुडिदसङ्करसरासणो, सिहंडमुद्धमुहमण्डलो, अज्जउत्तो आलिहिदे। (२)

लक्ष्म। आर्य्ये, पश्य पश्य।

सम्बन्धिनो वशिष्ठादीनेष तातस्तवार्चति,
गौतमश्च शतानन्दो जनकानां पुरोहितः।

रामः। दृष्टमेतत्।

जनकानां रघूणाञ्च सम्बन्धः कस्य न प्रियः,
यत्र दाता गृहीता च स्वयं कुशिकनन्दनः।

सीता। एदे क्खु तक्कालकिदगोदाणमङ्गला चत्तारो भादरो विआहदीक्खिदा तुह्मे आणामि, तस्सिं ज्जेव्व पदेसे! तस्सिं ज्जेव्व काले, वत्तामि। (३)

---

(१)। अनुगृहीतास्मि।

(२)। दलन्नवनीलोत्पलश्यामलस्निग्धमसृणशोभमानमांसलेन देहसौभाग्येन, विस्मयस्तिमिततातदृश्यमानसुन्दरश्रीरनादरखण्डितशङ्करशरासनः शिखण्डमुग्धमुखमण्डल, आर्य्यपुत्र आलिखितः।

(३)। एते खलु तत्कालकृतगोदानमङ्गलाश्चत्वारो भ्रातरो विवाहदीक्षिता यूयं जानामि तस्मिन्नेव प्रदेशे तस्मिन्नेव काले वर्त्ते।

राम:। समयः स वर्त्तत इवैष यत्र मां
समनन्दयत्, सुमुखि, गौतमार्पितः,
अयमुद्गृहीतकमनीयकङ्कण
स्तव, मूर्त्तिमानिव महोत्सवः, करः।

लक्ष्म। इयमार्य्या, इयमप्यार्य्या माण्डवी, इयमपि वधूः श्रुतकीर्त्तिः।

सीता। वच्छ, इअंपि अवरा का? (१)

लक्ष्म॥ सलज्जस्मित अपवार्य्य॥ अये, उर्म्मिलां पृच्छत्यार्य्या; भवत्वन्यतः संचरामि॥ प्रकाशं॥ आर्य्ये, दृश्यतां द्रष्टव्यमेतत्। अयञ्च भगवान् भार्गवः।

सीता। भीदह्मि। (२)

रामः। ऋषे नमस्ते।

लक्ष्म। आर्य्ये, पश्य पश्य; अयमसावार्य्येण॥ इत्यर्द्धोक्ते॥

रामः॥ साक्षेपं॥ अयि, वज्ञतरं द्रष्टव्यमन्यतोदर्शय।

सीता॥ सस्नेहवज्ञमानं निर्व्वर्ण्य॥ सुट्ठु सोहसि, अज्जउत्त, एदिणा विणअमाहप्पेण। (३)

---

(१)। वत्स, इयमपि अपरा का।

(२)। भीतास्मि।

(३)। शोभसे, आर्य्यपुत्र, एतेन विनयमाहात्म्येन।

लक्ष्म। एते वयमयोध्यां प्राप्ताः।

रामः॥ सास्रं॥ स्मरामि' हन्त, स्मरामि!

जीवत्सु तातपादेषु, नवे दारपरिग्रहे,
मातृभिश्चिन्त्यमानानां, ते हि नो दिवसा गताः!

इयमपि तदा जानकी।

प्रतनुविरलैः प्रान्तोन्मीलन्मनोहरकुन्तलै
र्दशनमुकुलैर्मुग्धालोकं शिशुर्दधती मुखं,
ललितललितैर्ज्योत्स्नाप्रायैरकृत्रिमविभ्रमै
रकृत मधुरैरम्बानां मे कुतूहलमङ्गकैः।

लक्ष्म। एषा मन्थरा।

रामः॥ अनुत्तरमन्यतो गत्वा॥ देवि वैदेहि;

इङ्गुदीपादपः सोऽयं, शृङ्गवेरपुरे पुरा,
निषादपतिना यत्र स्निग्धेनासीत्समागमः।

लक्ष्म॥ विहस्य स्वगतं॥ अये, मध्यमाम्बावृत्तान्तमन्तरितमार्य्येण।

सीता। अह्मो, एसो जटासञ्जमणवुत्तन्तो। (१)

लक्ष्म। पुत्रसंक्रान्तलक्ष्मीकैर्य्यद्वृद्धेक्ष्वाकुभिः कृतं,
धृतं बाल्ये तदार्य्येण पुण्यमारण्यकं व्रतं।

सीता। एसा पसण्णपुण्णसलिला भअवदी भाईरधी (२)

---

(१)। एष जटासंयमनवृत्तान्तः।

(२)। एषा प्रसन्नपुण्यसलिला भगवती भागीरथी।

राम:। देवि रघुकुलदेवते नमस्ते!

तुरगविचयव्यग्रानुर्वीभिदः सगराध्वरे,
कपिलमहसामर्षात् प्लुष्टान् पितुः प्रपितामहान्,
अगणिततनुत्तापं तप्त्वा तपांसि भगीरथो,
भगवति, तव स्पृष्टानद्भिश्चिरादुददीधरत्।

सा त्वमम्ब स्नुषायामरुन्धतीव सीतायां शिवानुध्यानपरा भव।

लक्ष्म। अयमसौ भरद्वाजावेदितश्चित्रकूटयायिनि वर्त्मनि वनस्पतिः कालिन्दीतटवटः श्यामो नाम।

सीता। सुमरेदि एदं पदेसं अज्जउत्तो? (१)

राम:। अयि कथं विस्मर्य्यते।

अलसलुलितमुग्धान्यध्वसंजातखेदा
दशिथिलपरिरम्भैर्दत्तसंवाहनानि,
परिमृदितमृणालीदुर्ब्बलान्यङ्गकानि,
त्वमुरसि मम कृत्वा यत्र निद्रामवाप्ता।

लक्ष्म। एष विन्ध्याटवीमुखे विराधसंरोधः।

सीता। अलं दाव एदिणा, पेक्खामि दाव अज्जउत्तहत्थधरिदतालवेण्टादवत्तं अत्तणो दक्खिणारण्णप्पवेसारम्भं (२)।

राम:। एतानि तानि गिरिनिर्झरिणीतटेषु,

वैखानसाश्रिततरूणि तपोवनानि।

---

(१)। स्मरत्येनं प्रदेशमार्य्यपुत्रः?

(२) अलन्तावदेतेन; प्रेक्षे तावदार्य्यपुत्रहस्तधृततालवृन्तातपत्रमात्मनो दक्षिणारण्यप्रवेशारम्भं।

यस्यातिथेयपरमाः शमिनो भजन्ते
नीवारमुष्टिपचना गृहिणो गृहाणि।

लक्ष्म। अविरलानोकहनिवहनिरन्तरस्निग्धनीलपरिसरारण्यपरिणद्धगोदावरीमुखरकन्दरः, सततमभिष्यन्दमानमेघ दुरितनीलिमा, जनस्थानमध्यगो गिरिः प्रस्रवणः।

रामः। स्मरसि, सुतनु, तस्मिन्पर्व्वते, लक्ष्मणेन,
प्रतिविहितसपर्य्यासुस्थयोस्तान्यहानि?
स्मरसि सरसतीरां तत्र गोदावरीं वा?
स्मरसि च तदुपान्तेष्वावयोर्व्वर्त्तनानि?

अपिच। किमपि किमपि मन्दं मन्दमासत्तियोगा
दविरलितकपोलं जल्पतोरक्रमेण;
सपुलकपरिरम्भव्यापृतैकैकदोष्णो
रविदितगतयामा रात्रिरेव व्यरंसीत्।

लक्ष्म। एषा पञ्चवट्यां शूर्पणखा।

सीता। हा, अज्जउत्त, एत्तिअं ज्जेव दंसणम्।(१)

रामः। अयि, विप्रयोगत्रस्ते, चित्रमेतत्।

सीता। जधा तधा भोदु; दुज्जणो असुहं उप्पादेदि।(२)

---

(१) हा, आर्य्यपुत्र, एतावदेव दर्शनं।
(२) यथा तथा भवतु दुर्जनोऽसुखमुत्पादयति।

रामः। हन्त वर्त्तमानइव जनस्थानवृत्तान्तः प्रतिभाति।

लक्ष्म। अथेदं रक्षोभिः कपटहरिणाच्छद्मविधिना,
तथा वृत्तं पापैर्व्यथयति यथा चालितमपि;
जनस्थाने शून्ये विकलकरणैरार्य्यचरितै
रपि ग्रावा रोदित्यपि, दलति वज्रस्य हृदयं।

सीता॥ सास्रमात्मगतम्॥ अइ देव, रघुकुलानन्द, एवं मम कारणादो कलिदोसि। (१)

लक्ष्म॥ रामं निर्व्वर्ण्य साकूतं॥ आर्य्य किमेतत्।
अयं ते वाष्पौघस्त्रुटितइव मुक्तामणिसरो,
विसर्पन् धाराभिर्लुठति धरणीं जर्जरकणः;
निरुद्धोऽप्यावेगः स्फुरदधरनासापुटतया
परेषामुन्नेयो भवति च भराध्मातहृदयः।

रामः। वत्स,
तत्कालप्रियजनविप्रयोगजन्मा
तीव्रोऽपि प्रतिकृतिवाञ्छया विसोढः;
दुःखाग्निर्मनसि पुनर्व्विपच्यमानो,
हृन्मर्म्मव्रणइव वेदनां करोति

सीता। हद्धी, हद्धी, अहंवि अदिभूमिङ्गदेण रणरणएण अज्जउत्तसुण्णं विअ अत्ताणं पेक्खामि। (२)

लक्ष्म॥ स्वगतं॥ भवलम्यतः क्षिपामि॥ चित्रं विलोक्य प्रका

(१) अयि देव, रघुकुलानन्द, एवं मम कारणात् क्लिष्टोऽसि।

(२) हा धिक्, हा धिक्, अहमपि अतिभूमिं गतेन रणरणकेन आर्य्यपुत्रशून्यमिवात्मानं प्रेक्षे।

र्य॥ तदेतन्मन्वन्तरपुराणगृध्रराजस्य तत्रभवतस्तातजटायुष श्चरित्रविक्रमोदाहरणं।

सीता। हा ताद, णिव्वुढो दे अवच्चसिणेहो।(१)

रामः। हा तात, काश्यप शकुन्तराज; क्व पुनस्त्वादृशस्य महतस्तीर्थस्य साधोः सम्भवः।

लक्ष्म। अयमसौ जनस्थानपश्चिमश्चित्रकुञ्जवान्नाम दनुक बन्धाधिष्ठितो दण्डकारण्यभूभागः;तदिदमृष्यमूकपर्व्वते मतङ्ग स्याश्रमपदं; इयञ्च श्रवणा नाम सिद्धशवरी; तदेतत्पम्पाभि धानं सरः।

सीता। एत्थ किल अज्जउत्तेण विच्छड्डिदामरिसधीर त्तणं प्पयुक्तकण्ठं रुदिअं आसि।(२)

रामः। देवि, रमणीयमेतत् पम्पासरः;

एतस्मिन् मदकलमल्लिकाक्षपक्ष
व्याधूतस्फुरदुरुदण्डपुण्डरीकाः;
वाष्पाम्भः परिपतनोद्गमान्तराले
संदृष्टाः कुवलयिनो भवो विभागाः।

लक्ष्म। अयमार्य्यो हनूमान्।

सीता। एसो सो चिरणिव्विसजीअलोअपच्चुद्धरणगुरु ओवआरी महाभाओ मारुदी।(३)

---

(१) हा तात, निर्व्यूढस्ते अपत्यस्नेहः।

(२) अत्र किलार्य्यपुत्रेण विच्छर्द्दितामर्षधीरत्वं प्रयुक्त कण्ठं रुदितमासीत्।

(२) एष स चिरनिर्व्विसजीवलोकप्रत्युद्धरणगुरूकोप कारी महाभागो मारुतिः।

रामः। दिष्ट्या सोऽयं महाबाहुरञ्जनानन्दवर्द्धनः,
यस्य वीर्य्येण कृतिनो वयञ्च, भुवनानि च।

सीता। वच्छ, एष कुसुमिदकअंवतरुतण्डविदवरहिणो किणामधेओ गिरी? जत्थ अणुभावसोहग्गमेत्तपरिसेसधूसरसिरी मुच्छन्तं मुच्छन्तो, तुए परुसेण अवलम्बिदो तरुअले अज्जउत्तो आलिहिदो। (१)।

लक्ष्म। सोऽयं शैलः ककुभसुरभिर्माल्यवान्नाम, यस्मिन्
नीलस्निग्धः श्रयति शिखरं नूतनस्तोयवाहः।

रामः। वत्सैतस्माद्विरम विरमाऽतः परं न क्षमोऽस्मि,
प्रत्यावृत्तः पुनरपि स मे जानकीविप्रयोगः।

लक्ष्म। अतःपरमार्य्यस्य तत्रभवतां कपिराक्षसानामसंख्यातान्युत्तरोत्तराणि, कर्म्माश्चर्य्याणि परिश्रान्ता चेयमार्य्या, तद्विज्ञापयामि विश्राम्यतामिति।

सीता। अज्जउत्त, एदिणा चित्तदंसणेण पच्चुप्पणदोहदाए अत्थि मे विस्णप्पं। (२)।

रामः। नन्वाज्ञापय।

---

(१) वत्स, एष कुसुमितकदम्बतरुताण्डवितवर्हिणः किन्नामधेयोगिरिः? यत्रानुभावसौभाग्यमात्रपरिशेषधूसरश्रीर्मुर्च्छन् मूर्च्छन्, त्वया प्ररुदितेनावलम्बितस्तरुतले आर्य्यपुत्र आलिखितः।

(२) आर्य्यपुत्रैतेन चित्रदर्शनेन प्रत्युत्पन्नदोहदाया अस्ति मे विज्ञाप्यं।

सीता। जाणे, पुणोवि प्रसस्सगम्भीरासु वणराजिसु विहरिस्सं, पवित्तसोम्यशिशिरावगाहां च भअवदीं भाइरहीं अवगाहिस्सं (१)

राम:। वत्स, लक्ष्मण।

लक्ष्म। एषोऽस्मि अचिरं संपादनीयो दोहद इति, संप्रत्येव गुरुभिरादिष्टं तदस्खलितसुखसंपातं रथमुपस्थापयं।

सीता। अज्जउत्त, तुझेहिंपि तहिं गंतव्वं। (२)।

राम:। अयि कठिनहृदये, एतदपि युष्माभिरपि वक्तव्यमेव।

सीता। तेण हि पिअं मे। (३)।

लक्ष्म। यथाज्ञापयत्यार्य्यः॥ इति निष्क्रान्तः॥

राम:। प्रिये, हन्त वातायनावर्त्तके मुहूर्त्तसंविष्टौ भवाव:।

सीता। एवं भोदु, ओहरिसामि क्खु परिस्समजणिदाए णिद्दाए। (४)

राम:। तेन हि निरन्तरमवलम्बस्व मामत्र शयनाय।

जीवयन्निव ससाध्वसश्रमस्वेदबिन्दुरधिकण्ठमर्प्यताम्।

वाहुरैन्दवमयूखचुम्बितस्यन्दिचन्द्रमणिहारविभ्रमः।

(१) जानामि पुनरपि प्रसन्नगम्भीरासु वनराजिषु विहरिष्यामि, पवित्रसौम्यशिशिरावगाहाञ्च भगवतीं भागीरथीमवगाहिष्ये।

(२) आर्य्यपुत्र, युष्माभिरपि तत्र गन्तव्यं।

(३) तेन हि प्रियं मे।

(४) एवं भवतु अपह्रिये खलु परिश्रमजनितया निद्रया।

॥ तथा कारयन् सानन्दं ॥ प्रिये, किमेतत्?

विनिश्चेतुं शक्यो न सुखमिति वा दुःखमिति वा
प्रमोहो, निद्रा वा, किमु विषविसर्प्पः, किमु मदः;
तव स्पर्शे स्पर्शे मम हि परिमूढेन्द्रियगणो,
विकारश्चैतन्यं भ्रमयति, च संमीलयति च।

सीता॥ विहस्य॥ त्थिरप्पसादा तुह्मे; इदोदाणिं किम वरं? (१)।

रामः।

म्लानस्य जीवकुसुमस्य विकाशनानि,
सन्तर्पणानि सकलेन्द्रियमोहनानि,
एतानि ते सुवचनानि सरोरुहाक्ष्याः,
कर्णामृतानि मनसश्च रसायनानि।

सीता। पिअंवद, एहि संविसंह्म (२)।

॥ शयनाय समन्ततो निरूपयति॥

रामः। किमन्वेष्टव्यं।

आविवाहसमयाद्गृहे, वने, शैशवे, तदनु यौवने पुनः,
स्वापहेतुरनुपाश्रितोऽन्यया, रामवाऊरूपधानमेष ते।

---

(१) स्थिरप्रसादा यूयं, इत इदानीं किमपरं?
(२) प्रियम्वद, एहि संविशामः।

सीता ॥ निद्रां नाटयन्ती ॥ अत्थि एदं अज्जउत्त, अत्थि एदमिति ॥ स्वपिति ॥ (१)

रामः। कथं प्रियवचना वचसि सुप्तैव ॥ निर्व्वर्ण्य सस्नेहं॥

इयं गेहे लक्ष्मीरियममृतवर्त्तिर्नयनयो,
रसावस्याः स्पर्शो वपुषि वहलश्चन्दनरसः,
अयं कण्ठे वाङः शिशिरमसृणो मौक्तिकसरः
किमस्या न प्रेयो यदि परमसह्यस्तु विरहः।

॥ प्रविश्य ॥ प्रतीहारी। देव, उअत्थिदो (२)।

रामः। अये, कः?

प्रती। आसस्सपरिचारओ, दुम्मुहो, देवस्स (३)।

रामः॥ स्वगतं॥ शुद्धान्तचारी दुर्मुखः स मया पौरजानपदानुपसर्पितुं प्रयुक्तः॥ प्रकाशं॥ आगच्छतु।

॥ प्रतीहारी निष्क्रान्ता ॥

॥ प्रविश्य ॥ दुर्म्मुखः॥ स्वगतं॥ हा, कधं सीदा देइए ईदिसं अचिन्तणिज्जं जणाववादं देवस्स कधइस्सं; अहवा, णिओअः क्खु मे ईदिसो मन्दभाअस्स (४)।

---

(१) अस्त्येतत् आर्य्यपुत्रास्त्येतत्।

(२) देव, उपस्थितः।

(३) आसन्नपरिचारको, दुर्मुखो, देवस्य।

(४) हा कथं सीता देव्या ईदृशं अचिन्तनीयं जनापवादं देवस्य कथयिष्यामि; अथवा, नियोगः खलु ईदृशो मन्दभाग्यस्य।

॥ सीता उत्स्वायते॥ हा अज्ज उत्त, सोम्म, कहिंसि? (१)

राम:। अये ममैव रणरणकदायिनी चित्रदर्शनादिरह भावना देव्या:, स्वप्नोद्वेगं करोति ॥ सस्नेहं परामृशन्॥

> अद्वैतं सुखदु:खयोरनुगुणं सर्व्वास्ववस्थासु य
> द्विश्रामो हृदयस्य, यत्र जरसा यस्मिन्नहार्य्यो रस:
> कालेनावरणात्ययात्परिणते यत् स्नेहसारे स्थितं,
> भद्रं तस्य सुमानुषस्य, कथमप्येकं हि तत्प्राप्यते।

दुर्मु ॥ उपसृत्य ॥ जअदि, जअदि, देओ।

राम:। ब्रूहि यदुपलब्धं।

दुर्मु। उवत्थुवन्ति देअं पोरजाणवदा, विसुमरिदा अह्मे महाराअदशरहस्स रामभद्देणेति (२)।

राम:। अर्थवाद एष:, दोषन्तु कंचित् कथय, येन तत्प्रति विधीयते।

दुर्मु॥ सास्त्रं ॥ सुणादु देओ। (३) ॥ कर्णे एवमेवं।

राम: अहह ॥ इति मूर्च्छति ॥

---

(१) हा आर्य्यपुत्र, सौम्य, कुत्रासि?

(२) उपस्तुवन्ति देवं पौरजानपदा, विस्मारिता वयं महाराजदशरथस्य रामभद्रेण।

(३) शृणोतु देव:।

दुर्मु। आस्ससदु देओ (१)।

राम: ॥ आश्वस्य ॥

हा हा धिक् परगृहवासदूषणं य
द्वैदेह्याः प्रशमितमद्भुतैरुपायैः,
एतत्तत्पुनरपि दैवदुर्व्विपाका
दालर्कं विषमिव सर्व्वतः प्रसृप्तम्।

तत्किमत्र मन्दभाग्यः करोमि॥ विमृश्य सकरुणं ॥अथवा किमन्यत्।

सताङ्केनापि कार्य्येण लोकस्याराधनं व्रतं'
यत्पूरितं हि तातेन माञ्च प्राणांश्च मुञ्चता।

संप्रत्येव भगवता वशिष्ठेन सन्दिष्टं।

अपिच।

यत्साविचैर्दीपितं भूमिपालै,
र्लोकश्रेष्ठैः साधु शुद्धं चरित्रम्;
मत्सम्बन्धात् कश्मला किम्वदन्ती,
स्याच्चेदस्मिन् हन्त धिङ्मामधन्यं।

हा देवि, देवयजनसम्भवे, हा स्वजन्मानुग्रहपविचितवसुन्धरे, हा निमिजनकवंशनन्दिनि; हा पावकवशिष्ठारुन्धतीप्रशस्तशीलशालिनि; हा राममयजीविते; हा महारण्यवासप्रिय

(१) आश्वसतु देवः।

सखि, हा लोकप्रियवादिनि; कथमेवं विधायास्तवायमीदृशः परिणामः।

त्वया जगन्ति पुण्यानि, त्वय्यपुण्या जनोक्तयः;
नाथवन्तस्त्वया लोकास्त्वमनाथा विपत्स्यसे।

दुर्मुख ब्रूहि लक्ष्मणं, एष ते नूतनो राजा रामः समाज्ञापयति ॥ कर्णे एवमेवं ॥

दुर्मु। कधं दाणीं अग्गिपरिसुद्धाए गब्भपरिस्फुडिद पवित्तरऊउलसंताणाए देवीए दुज्जणवअणादो, अज्जेण एवं अणज्जं ववसिदं देवेण (१)।

रामः। शान्तं कथं दुर्ज्जनाः पौरजानपदाः।
इक्ष्वाकुवंशोऽभिमतः प्रजानां, जातञ्च दैवादचनीयवीजं,
तचाद्भुतं कर्म्म विशुद्धिकाले, प्रत्येतु कस्तद्भुवि दूरवृत्तं।
तद्गच्छ।

दुर्मु। हा देवि ॥ इति निष्क्रान्तः॥

रामः। हा कष्टमतिवीभत्सकर्म्मा नृशंसोऽस्मि संवृत्तः।
शैशवात्प्रभृति पोषितां प्रियैः सौहृदादपृथगाशयां प्रियां,
छद्मना परिददामि मृत्यवे, सौनिको गृहशकुन्तिकामिव।

---

(१) कथमिदानीमग्निपरिशुद्धाया गर्भपरिस्फुरितपवित्र रघुकुलसन्तानाया देव्या दुर्जनवचनात्, आर्य्येणानार्य्यं व्यवसितं देवेन।

तत्किमस्पर्शनीयः पातकी देवीं दूषयामि ॥ सीतायाः शिरः स्वैरमुन्नमय्य बाहुमाकर्षयन् ॥

अपूर्व्वकर्म्मचाण्डालमयि मुग्धे विमुञ्च माम्;
श्रितासि चन्दनभ्रान्त्या दुर्व्विपाकविषद्रुमम्।

॥ उत्थाय ॥ हन्त विपर्य्यस्तः संप्रति जीवलोकः; पर्य्यवसितं जीवितप्रयोजनं रामस्य, शून्यमधुना जीर्णारण्यं जगत्। असारः संसारः; कष्टप्रायं शरीरं; अशरणस्तु किङ्करोमि, का गतिः; अथवा!

दुःखसंवेदनायैव, रामे चैतन्यमाहितं,
मर्म्मोपघातिभिः प्राणैर्वज्रकीलायितं स्थिरैः।

हा अम्ब, अरुन्धति; हा भगवन्तौ विश्वामित्रवशिष्ठौ; हा भगवन् पावक; हा देवि भूतधात्रि; हा तात जनक; हा तात, हा मातरः; हा परमोपकारिन् लङ्काधिपते विभीषण; हा प्रियसखे सुग्रीव; हा सौम्य हनूमन्; हा सखि त्रिजटे; मुषिताः स्थ, परिभूताः स्थ रामहतकेन। अथवा, कस्य तेषामहमिदानीमाह्वाने।

ते हि, मन्ये, महात्मानः, कृतघ्नेन दुरात्मना,
मया गृहीतनामानः, स्पृश्यन्त इव पाप्मना।

योऽहम्

विस्रम्भादुरसि निपत्य लब्धनिद्रा
मुन्मुच्य प्रियगृहिणीं गृहस्य शोभाम्,

आतङ्कस्फुरितकठोरगर्भगर्वां,
क्रव्याद्भ्यो बलिमिव, निर्घृणः क्षिपामि।

॥ सीतायाः पादौ शिरसि कृत्वा ॥ देवि, देवि, अयं पश्चिमस्ते रामस्य शिरसा पादपङ्कजस्पर्श इति ॥ रोदिति ॥

॥ नेपथ्ये ॥ अब्रह्मण्यमब्रह्मण्यम्।

रामः। ज्ञायतां भोः किमेतत्।

पुनर्नेपथ्ये। ऋषीणामुग्रतपसां, यमुनातीरवासिनां,
लवणत्रासितः स्तोमः, शरणं त्वामुपस्थितः।

रामः। आः कथमद्यापि राक्षसत्रासः; तद्यावदस्य दुरात्मनः कुम्भीनसीपुत्रस्योन्मूलनाय शत्रुघ्नं प्रेषयामि ॥ कतिचित् पदानि गत्वा, पुनः प्रतिनिवृत्य ॥ हा देवि, कथमेवं गता भविष्यसि? भगवति, वसुन्धरे, श्लाघ्यां दुहितरमवेक्षस्व जानकीं।

जनकानां रघूणाञ्च यत्कृत्स्नं गोत्रमङ्गलं,
त्वं देवयजने पुण्ये पुण्यशीलामजीजनः।

॥ इति निष्क्रान्तः ॥

सीता। हा सोम्म, अज्जउत्त, कहिंसि ॥ सहसोत्थाय॥ हद्धी, हद्धी, दुस्सिविणएण विप्पलद्धा हं; अज्जउत्तमाक्कन्दामि। हद्धी, हद्धी, कधमेआणीं मं परिसुत्तं उज्झिअ अज्जउत्तो गदो; ता किं दाणिं एदम? भोदु, कुविस्सं, जइ तं पेक्खन्ती अत्तणो पहविस्सं। को एत्थ परिअणो (१)।

---

(१) हा सौम्य, आर्य्यपुत्र, कुत्रासि? हा धिक् दुःस्वप्नेन

॥ प्रविश्य ॥ दुर्मु । देइ, कुमारलक्खणो विस्णवेदि, सज्जो रहो आरुहदु देई (१)।

सीता। इयं आरुह्मि; परिस्फुरदि विश्र मे गब्भभारो, ता सणिअं गच्छह्म (२)।

दुर्मु। इदो, इदो, देइ।

सीता। णमो णमो तपोधणाणं; णमो णमो रउउलदेवदाणं; णमो णमो अज्जउत्तचरणकमलाणं; णमो णमो सअलगुरुअणाणं (३)।

॥ इति निष्क्रान्तौ; चित्रदर्शनो नाम प्रथमोऽङ्कः॥

विप्रलब्धाहं, आर्य्यपुत्रमाक्रन्दामि। हा धिक् हा धिक्, कथमेकाकिनीं मां परिसुप्तामुज्झित्वा आर्य्यपुत्रो गतः; तत्किमिदानीमेतत्? भवत्वस्य कुपिष्ये, यदि तं प्रेक्षमाणा आत्मनः प्रभविष्यामि। कोऽत्र परिजनः।

(१) देवि, कुमारलक्ष्मणो विज्ञापयति; सज्जो रथ, आरोहतु देवी।

(२) इयमारुहामि; परिस्फुरतीव मे गर्भभारस्ततः शनैर्गच्छामः।

(३) नमो नमस्तपोधनेभ्यो; नमो नमो रघुकुलदेवताभ्यः, नमो नम आर्य्यपुत्रचरणकमलाभ्यां; नमो नमः सकलगुरुजनेभ्यः।

अथ द्वितीयोऽङ्कः।

॥ नेपथ्ये ॥ स्वागतं तपोधनायाः।

॥ प्रविश्य ॥ अध्वगवेशा तापसी। अये वनदेवतेयं फलकुसुमपल्लवार्घ्येण मामुपतिष्ठते।

॥ प्रविश्य ॥ वनदेवता ॥ अर्घ्यं विकीर्य्य ॥

यथेच्छं भोग्यं वो वनमिदमयं मे सुदिवसः;
सतां सद्भिः सङ्गः कथमपि हि पुण्येन भवति?
तरुच्छाया, तोयं, यदपि तपसो योग्यमशनं,
फलं वा, मूलं वा, तदपि न पराधीनमिह वः।

ताप। किमत्रोच्यते?

प्रियप्राया वृत्तिर्विनयमधुरो, वाचि नियमः,
प्रकृष्णा कल्याणी मतिरनवगीतः परिचयः;
पुरा वा, पश्चाद्वा, तदिदमविपर्य्यासितरसं,
रहस्यं साधूनामनुपधि विशुद्धं विजयते।

॥ इत्युपविशतः ॥

वन। कां पुनरत्रभवतीमवगच्छामि?

ताप। आत्रेय्यस्मि।

वन। आत्रेयि, कुतः पुनरिहागम्यते? किंप्रयोजनो वा दण्डकारण्यप्रचारः?

आत्रे।

अस्मिन्नगस्त्यप्रमुखाः प्रदेशे भूयांस उद्गीथविदो वसन्ति; तेभ्योऽधिगन्तुं निगमान्तविद्यां वाल्मीकिपार्श्वादिह पर्य्यटामि।

वन। यदा तावदन्येऽपि मुनयस्तमेव हि पुराणब्रह्मवादिनं प्राचेतसमृषिं ब्रह्मपारायणायोपासते, तत्कोऽयमत्रार्य्याया दीर्घप्रवासप्रयासः।

आत्रे। तत्र महानध्ययनप्रत्यूह इति एष दीर्घप्रवासोऽङ्गीकृतः।

वन। कीदृशः?

आत्रे। तस्य भगवतः केनापि देवताविशेषेण सर्व्वप्रकाराद्भुतं स्तन्यत्यागमात्रके वयसि वर्त्तमानन्दारकद्वयमुपनीतं; तत् खलु न केवलमृषीणामपि तु सचराचराणां भूतानामान्तराणि तत्त्वान्युपस्नेहयति।

वन। अयि, तयोर्नामसंविज्ञानमस्ति?

आत्रे। तयैव किल देवतया तयोः कुशलवाविति नामनी प्रभावश्चाख्यातः।

वन। कीदृशः प्रभावः?

आत्रे। तयोः सरहस्यजृम्भकास्त्राणि आजन्मसिद्धानीति।

वन। भोश्चित्रमेतत्!

आत्रे। तौ च भगवता वाल्मीकिना धात्रीकर्म्मवस्तुतः परिगृह्य, पोषितौ, परिरक्षितौ च; वृत्तचौडकर्म्मणोश्च तयोस्त्रयीवर्ज्जमितरास्त्रविद्यां सावधानेन परिनिष्ठापितौ; समनन्तरञ्च

गर्भैकादशे वर्षे चात्रेण कल्पेनोपनीय, गुरुणा त्रयीविद्यामध्यापितौ; नैह्योताभ्यामतिप्रदीप्तमेधाप्रज्ञाभ्यामस्मदादेः सहाध्ययनयोगोऽस्ति, ।

यतः ।

वितरति गुरुः प्राज्ञे विद्यां यथैव, तथा जडे,
न च खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा;
भवति च पुनर्भूयान् भेदः फलं प्रति, तद्यथा
प्रभवति शुचिर्बिम्बोद्ग्राहे मणिर्न मृदां चयः ।

वन । अयमसावध्ययनविघ्नः ।

आत्रे । अपरस्य ।

वन । अथापरः कः ?

आत्रे । अथ स ब्रह्मर्षिरेकदा मध्यंदिनसमये नदीं तमसामनुप्राप्तः; तत्र युग्मचारिणोः क्रौञ्चयोरेकं व्याधेन विध्यमानं शकुन्तमपश्यत्; आकस्मिकप्रत्यवभाषास्य देवीं वाचमव्यतिकीर्णवर्णामनुष्टुभेन छन्दसा परिछिन्नामभ्युदैरयत् ।

मा, निषाद, प्रतिष्ठां त्वमगमः शाश्वतीः समाः,
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितं ।

वन् । चित्रमाम्नायादन्यो नूतनश्छन्दसामवतारः ।

आत्रे । तेन खलु पुनः समयेन तं भगवन्तमाविर्भूतशब्दब्रह्मप्रकाशमृषिमुपसंक्रम्य भगवान् भूतभावनः पद्मयोनिरवोचत्; ऋषे, प्रबुद्धोऽसि वागात्मनि ब्रह्मणि, तद्ब्रूहि रामचरितमव्याहतज्योतिरार्षन्ते प्रातिभं चक्षुः; आद्यः कविरसीत्युक्त्वा, तत्रै

वान्तर्हितः। अथ भगवान् प्राचेतसः, प्रथमं मनुष्येषु शब्दब्रह्मणस्तादृशं विवर्त्तमितिहासं रामायणमृषिः प्रणिनाय।

वन। हन्त, तर्हि पण्डितः संसारः।

आत्रे। तस्मादवोचन्तदनुरोधात्तत्र हि महाध्ययनप्रत्यूहइति।

वन। युज्यते।

आत्रे। विश्रान्तास्मि, भद्रे, संप्रत्यगस्त्याश्रमस्य पन्थानं ब्रूहि।

वन। इतः पञ्चवटीमनुप्रविश्य, गम्यतामेतेन गोदावरीतीरेण।

आत्रे ॥ सवाष्पं॥ अप्येतत्तपोवनं, अप्येषा पञ्चवटी, अपि सरिदियं गोदावरी, अप्ययं गिरिः प्रस्रवणः, अपि जनस्थानदेवता वासन्ती त्वं?

वास। अस्त्येतत् सर्व्वं।

आत्रे। वत्से जानकि!

स एष ते वल्लभबन्धुवर्गः प्रासङ्गिकीनां विषयः कथानां;
त्वां नाम शेषामपि वर्त्तमानां प्रत्यक्षदृश्यामिव नः करोति।

वास ॥ सभयं॥ कथं नाम शेषामित्याह? आर्य्ये, किमत्याहितं सीता देव्याः?

आत्रे। न केवलमत्याहितं; सापवादमपि ॥ कर्णे एवमेवं॥

वास। अहह दारुणो दैवनिर्घातइति ॥ मूर्च्छति ॥

आत्रे। भद्रे, समाश्वसिहि, समाश्वसिहि।

वास। हा प्रियसखि, हा महाभागे, ईदृशस्ते निर्म्माणभागः

रामभद्र, रामभद्र, अथवा अलं त्वया। आर्य्ये आत्रेयि, अथ तस्मादरण्यात् परित्यज्य, निवृत्ते लक्ष्मणे, सीता देव्याः किं वृत्तमिति काचिदस्ति प्रवृत्तिः?

आत्रे। नहि, नहि।

वास। हा कष्टमरुन्धतीवशिष्ठाधिष्ठितेषु, रघुकुलकदम्बकेषु जीवन्तीषु, प्रवृद्धराज्ञीषु, कथमिदं जातं?

आत्रे। ऋष्यशृङ्गाश्रमे गुरुजनस्तदासीत्; सम्प्रति परिसमाप्तं तद्वादशवार्षिकं सत्रं, ऋष्यशृङ्गेण च संपूज्य, विसर्ज्जिता गुरवः। ततो भगवत्यरुन्धती नाहं बधूविरहितामयोध्यां गमिष्यामीत्याह; तदेव राममातृभिरनुमोदितं; तदनुरोधाद्भगवतो वशिष्ठस्य परिशुद्धा वाचो, यथा वाल्मीकितपोवनं गत्वा, तत्र वत्स्याम इति।

वास। अथ स राजा किमाचारः सम्प्रति?

आत्रे। तेन राज्ञा क्रतुरश्वमेधः प्रक्रान्त।

वास। अहह, धिक् परिणीतमपि शान्तं, शान्तं! का तर्हि यज्ञे सहधर्म्मचारिणी?

आत्रे। हिरण्मयी सीताप्रतिकृतिः।

वास। हन्त भोः!

वज्रादपि कठोराणि, मृदूनि कुसुमादपि,
लोकोत्तराणां चेतांसि, को नु विज्ञातुमर्हति?

आत्रे। विसृष्टश्च वामदेवानुमन्त्रितो मेध्योऽश्वः, उप

कल्पितास्त्र यथाशास्त्रं तस्य रचितारः, तेषामधिष्ठाता, लक्ष्मणात्मजश्चन्द्रकेतुरवाप्तदिव्यास्त्रसम्प्रदायश्च, साधनान्वितोऽनुप्रहितः।

वास ॥ सस्नेहकौतुकास्रं॥ कुमारलक्ष्मणस्यापि पुत्रः; हन्त मातर्जीवामि, जीवामि।

आत्रे। अत्रान्तरे, ब्राह्मणेन, मृतं पुत्रमारोप्य राजद्वारि, सोरस्ताडनमब्रह्मण्यमुद्घोषितं; ततो न राजापराधमन्तरेण प्रजायामकालमृत्युश्चरतीत्यात्मदोषं निरूपयति, करुणामये रामभद्रे, सहसैवाशरीरिणी वागुदचरत्;

शम्बूको नाम वृषलः पृथिव्यां तपते तपः,
शीर्षच्छेद्यः स ते राम, तं हत्वा जीवय द्विजं।

इत्युपश्रुत्यैवाकृष्टकृपाणपाणिः, पुष्पकं विमानमारुह्य, सर्व्वा दिशो विदिशश्च शूद्रतापसान्वेषणाय, जगत्पतिश्चरितुमारब्धवान्।

वास। शूद्रः शम्बूको नाम धूमपोऽस्मिन्नेव जनस्थाने तपश्चरतीति तदपि नाम रामभद्रः पुनरपीदं वनमलंकुर्य्यात्।

आत्रे। भद्रे, गम्यतेऽधुना।

वास। आर्य्ये, आत्रेयि, एवमस्तु कठोरीभूतस्तु दिवसः। तथाहि।

कण्डूलद्विपगण्डपिण्डकषणोत्कम्पेन, सम्पातिभि
धर्म्मस्रंसितबन्धनैः स्वकुसुमैरर्च्चन्ति गोदावरीं।

छायापस्किरमाणविष्किरमुखव्याकृष्टकीटत्वचः,
कूजत्क्लान्तकपोतकुक्कुटकुलाः कूले कुलायद्रुमाः ।

॥ इति निष्क्रान्ते ॥ विष्कम्भकः ॥

॥ ततः प्रविशति सदयोद्यतखड्गो रामभद्रः ॥

हे हस्त दक्षिण, मृतस्य शिशोर्द्विजस्य
जीवातवे, विसृज शूद्रमुनौ कृपाणं ।
रामस्य गात्रमसि, दुर्वहगर्भखिन्न
सीताप्रवासनपटोः, करुणा कुतस्ते?

॥ अथ कथञ्चित् प्रहृत्य ॥ कृतं रामसदृशं कर्म; अपि जीवेत् स ब्राह्मणपुत्रः ।

॥ प्रविश्य ॥ दिव्यपुरुषः । जयति जयति देवः ।

दत्ताभये, त्वयि यमादपि दण्डधारे,
सञ्जीवितः शिशुरयं, मम चेयमृद्धिः ।
शम्बूक एष शिरसा चरणौ नतस्ते;
सत्सङ्गजानि निधनान्यपि तारयन्ति ।

रामः । इयमपि प्रियं नः; तदनुभूयतामुग्रतपसः फलं ।

यत्रानन्दाश्च, मोदाश्च, यत्र पुण्याभिसम्भवाः
वैराजा नाम ते लोकास्तैजसाः सन्तु ते शिवाः ।

शम्बू । युष्मत्पादप्रसादनोपाय एष महिमा; किमत्र तपसः फलं? अथवा महदुपकृतं तपसा ।

अन्वेष्टव्यो यदसि भुवने भूतनाथः शरण्यो,
मामन्विष्यन्निह वृषलकं, योजनानां शतानि
क्रान्त्वा, प्राप्तः, स इह तपसां सम्प्रसादो,ऽन्यथा चेत्,
क्वायोध्यायाः पुनरुपगमो दण्डकायां वने वः।

रामः। किन्नाम दण्डकेयं॥ सर्व्वतोऽवलोक्य,॥ आ कथं?

स्निग्धश्यामाः क्वचिदपरतो भीषणाभोगरूक्षाः,
स्थाने स्थाने मुखरककुभो झाङ्कृतैर्निर्झराणां।
एते तीर्थाश्रमगिरिसरिद्गर्भकान्तारमिश्राः,
संदृश्यन्ते परिचितभुवो दण्डकारण्यभागाः।

शम्बू। दण्डकैवेयमत्र किल निवसता देवेन,
चतुर्दश सहस्राणि चतुर्दश च राक्षसाः,
त्रयश्च दूषणखरत्रिमूर्द्धानो, निपातिताः।
येन, सिद्धं चेत्रे जनस्थाने माद्दशानामपि भीरुजनपदानाम
कुतोभयः सञ्चारो जातः।

रामः। न केवलं दण्डकेयं, किन्तु जनस्थानमपि?

शम्बू। वाढमेतानि खलु सर्व्वभूतलोमहर्षणान्युन्मत्तचण्ड श्वापदकुलसङ्कुलगिरिगह्वराणि जनस्थानपर्य्यन्तानि, दीर्घारण्यानि दक्षिणां दिशमभिवर्त्तन्ते।

तथाहि।

निष्कूजस्तिमिताः क्वचित्, क्वचिदपि प्रोच्चण्डसत्त्वस्वनाः,
स्वेच्छासुप्तगभीरघोरभुजगश्वासप्रदीप्ताग्नयः;

सीमानः प्रदरोदरेषु विलसत्स्वल्पाम्भसो यास्वयं
तृष्यद्भिः प्रतिसूर्य्यकैरजगरस्वेदद्रवः पीयते।

रामः। पश्यामि च जनस्थानं भूतपूर्व्वखरालयं।
प्रत्यक्षमिव वृत्तान्तान् पूर्व्वाननुभवामि च।

॥ सर्व्वतोऽवलोक्य ॥ प्रियारामा हि सर्व्वथा वैदेह्यासीत्। एतानि तानि नाम कान्ताराणि! किमतः परं भयानकस्य॥ शास्त्रं॥

त्वया सह निवत्स्यामि वनेषु मधुगन्धिषु;
इति चारमतीवासौ स्नेहस्तस्याः स तादृशः।
अकिञ्चिदपि कुर्व्वाणः सौख्यैर्दुःखान्यपोहति,
तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः?

शम्बू। तदलमेभिर्दुरासदैः। अथैतानि मदकलमयूरकण्ठकोमलच्छविभिरवकीर्णानि पर्व्वतैरविरलनिविष्टनीलवहलच्छायतरुणतरुखण्डमण्डितान्यसंभ्रान्तविविधमृगयूथानि, पश्यतु महानुभावः, प्रशान्तगभीराणि मध्यमारण्यकानि।

इह समदशकुन्ताक्रान्तवानीरवीरु
त्प्रसवसुरभिशीतस्वच्छतोया वहन्ति,
फलभरपरिणामश्यामजम्बूनिकुञ्ज
स्खलनमुखरभूरिस्रोतसो निर्झरिण्यः।
दधति कुहरभाजामत्र भल्लूकयूना
मनुरसितगुरूणि स्त्यानमम्बूकृतानि

शिशिरकटुकषायः स्त्यायते शल्लकीना
मिभदलितविकीर्णग्रन्थिनिस्यन्दगन्धः ।

रामः ॥ सवाष्पस्तम्भं ॥ शिवास्ते पन्थानो ; देवयानं प्रतिपद्यस्व पुण्येभ्यो लोकेभ्यः ।

शम्बू । यावत् पुराणब्रह्मवादिनमगस्त्यमृषिमभिवाद्य शाश्वतं पदमनुप्रविशामि ॥ इति निष्क्रान्तः ॥

रामः । एतत्तदेव हि वनं पुनरद्य दृष्टं,
यस्मिन्नभूम चिरमेव पुरा वसन्तः ;
आरण्यकाश्च गृहिणश्च रताः स्वधर्मे,
सांसारिकेषु च सुखेषु वयं रसज्ञाः ।

अपिच ।

एते तएव गिरयो विरुवन्मयूरा
स्तान्येव मत्तहरिणानि वनस्थलानि,
आमञ्जुवञ्जुललतानि च तान्यमूनि ;
नीरन्ध्रनीलनिचुलानि सरित्तटानि ।

मेघमालेव यश्चायमारादपि विभाव्यते,
गिरिः प्रस्रवणः सोऽयं, यत्र गोदावरी नदी ।

अस्यैवासीन्महति शिखरे गृध्रराजस्य वास
स्तस्याधस्ताद्वयमपि रतास्तेषु पर्णोटजेषु ।
गोदावर्याः पयसि विततश्यामलानोकहश्री
रन्तः कूजन्मुखरशकुनो यत्र रम्यो वनान्तः ।

तदत्रैव सा पञ्चवटी, यत्रातिचिरनिवासेन विविधविस्रम्भातिप्रसङ्गसाक्षिणः प्रदेशाः प्रियायाः, प्रियसखी च वासन्ती नाम वनदेवता प्रतिवसति। तत् किमिदमापतितमद्य रामस्य ॥ सम्प्रति हि ॥

चिरोद्वेगारम्भी प्रसृतइव तीव्रो विषरसः,
कुतश्चित्संवेगात्प्रचलितइव शल्यस्य शकलः;
व्रणो रूढग्रन्थिः स्फुटितइव हृन्मर्म्मणि पुन
र्घनीभूतः शोको विकलयति, संमूर्च्छयति च।

तथापि तान् पूर्व्वसुहृदो भूमिभागान् पश्यामि ॥ निरूप्य ॥ अहो अनवस्थितोभूमिसंनिवेशः।

पुरा यत्र स्रोतः पुलिनमधुना तत्र सरितां,
विपर्य्यासं यातो घनविरलभावः क्षितिरुहां।
बहोर्दृष्टं कालादपरमिव मन्ये वनमिदं,
निवेशः शैलानां तदिदमिति बुद्धिं द्रढयति।

हन्त, परिहरन्तमपि मामितः पञ्चवटीप्रदेशो बलादाकर्षतीव ॥ सकरुणं ॥

यस्यान्ते दिवसास्तया सह मया नीता यथा स्वे गृहे
यत्सम्बन्धिकथाभिरेव सततं दीर्घाभिरास्थीयते।
एकः सम्प्रति नाशितप्रियतमस्तामद्य, रामः, कथं
पापः पञ्चवटीं विलोकयतु वा, गच्छत्वसम्भावनां।

॥ प्रविश्य शम्बूकः॥ जयति देवः। देव, भगवानगस्त्यो मत्तः श्रुतभवत्संविधानस्त्वामाह। परिकल्पितविमानावतरणमङ्गला प्रतीक्षते वत्सला लोपामुद्रा, सर्व्वे चागस्त्यायनास्तदेहि, सम्भावयास्मान्, अथ प्रजविना पुष्पकेण स्वदेशमुपगम्याश्वमेधाय सज्जो भविष्यसीति।

रामः। यथाज्ञापयति भवान्।

शम्बू। इतस्तर्हि देवः प्रवर्त्तयतु पुष्पकं।

रामः। भगवति पञ्चवटि, गुरुजनोपरोधात् क्षणं क्षम्यतामतिक्रमो रामस्य।

शम्बू। देव, पश्य, पश्य;

कूजत्कुञ्जकुटीरकौशिकघटाघुत्काररवत्कीचक
स्तम्बाडम्बरमूकमौकुलिकुलः क्रौञ्चावतोऽयं गिरिः।
एतस्मिन् प्रचलाकिनां प्रचलतामुद्वेजिताः कूजितै
रुद्वेल्लन्ति पुराणरोहिणतरुस्कन्धेषु कुम्भीनसाः।

अपिच;

एते ते कुहरेषु गद्गदनदद्गोदावरीवारयो,
मेघालम्बितमौलिनीलशिखराः क्षोणीभृतो दक्षिणाः;
अन्योन्यप्रतिघातसङ्कुलचलत्कल्लोलकोलाहलै
रुत्तालास्त इमे गभीरपयसः पुण्याः सरित्सङ्गमाः।

॥ इति निष्क्रान्ताः सर्व्वे॥ द्वितीयोऽङ्कः॥

॥ अथ तृतीयोऽङ्कः ॥

॥ ततः प्रविशति नदीद्वयं तमसा मुरला च ॥

तमसा। सखि मुरले, किमसि संभ्रान्तेव?

मुरला। भगवति तमस, प्रेषितास्मि भगवतोऽगस्त्यस्य पत्न्या लोपामुद्रया सरिद्वरां गोदावरीमभिधातुं; जानास्येव यथा बधूत्यागात् प्रभृति,

अनिर्भिन्नगभीरत्वादन्तर्गूढघनव्यथः,
पुटपाकप्रतीकाशो रामस्य करुणो रसः।

तेन च तथाविधेष्टजनकष्टविनिपातजन्मना प्रकर्षगतेन दीर्घशोकसन्तापेन' संप्रत्यतितरां परिक्षीणो रामभद्रः; तमव लोक्य, कम्पितमिव मे हृदयं; अधुना च प्रतिनिवर्त्तमानेन रामभद्रेण नियतमेव पञ्चवटीवने बधूसहनिवासविस्रम्भसाक्षिणः प्रदेशा द्रष्टव्याः; तेषु च, निसर्गधीरस्याप्येवंविधायामवस्थायामतिगम्भीराभोगशोकक्षोभसम्वेगात, पदे पदे महान्ति प्रमादस्थानानि शङ्कनीयानि रामभद्रस्य। तद्भगवति गोदावरि, तत्र त्वया सावधानया भवितव्यं।

वीचीवातैः शीकरक्षोदशीतैराकर्षद्भिः पद्मकिञ्जल्कगन्धान्।
मोहे मोहे रामभद्रस्य जीवं स्वैरं स्वैरं प्रेषितैस्तर्पयेति।

तम। उचितमेव दाक्षिण्यं स्नेहस्य ; सञ्जीवनोपायस्तु मौलिकएव रामभद्रस्याद्य सन्निहितः।

मुर। कथमिव?

तम। श्रूयतां ; पुरा किल वाल्मीकितपोवनोपकण्ठात् परित्यज्य, गते लक्ष्मणे, सीता देवी प्राप्तप्रसववेदनात्मानमतिदुःखसंवेगाद्गङ्गाप्रवाहे निक्षिप्तवती।

मुर। तदैव, तत्र दारकद्वयं प्रसूता भगवतीभ्यां पृथ्वीभागीरथीभ्यामभ्युपपन्ना रसातलञ्च नीता ; स्तन्यत्यागात् परेण च, सुतद्वयं तस्याः, प्राचेतसस्य महर्षेर्गङ्गादेवी स्वयमर्पितवती।

ईदृशानां विपाकोऽपि जायते पावनाद्भुतः,
यत्रोपकरणीभावमायात्येवंविधो जनः।

तम। इदानीन्तु शम्बूकवधवृत्तान्तेनानेन सम्भावितजनस्थानगमनं रामभद्रं सरयूमुखादुपश्रुत्य, भागीरथी, यदेव भगवत्या लोपामुद्रया स्नेहादाशङ्कितं, तदेवाशङ्क्य, सीतासमेता केनचिदिव गृहाचारव्यपदेशेन गोदावरीं विलोकयितुमागता।

मुर। सुविचिन्तितं भगवत्या; राजधानीस्थितस्य खलु तस्तैर्जगतामाभ्युदयिकैः कार्य्यैर्व्यापृतस्य रामभद्रस्य नियताश्चित्तविक्षेपाः ; अव्यग्रस्य पुनरस्य शोकमात्रद्वितीयस्य पञ्चवटीप्रवेशो महाननर्थइति ; तत्कथमिदानीं सीतादेव्या रामभद्र आश्वासनीयः स्यात्।

तम॥ उक्तमद्य भगवत्या भागीरथीदेव्या; वत्से, देवय जनसम्भवे सीते, अद्य खल्वायुष्मतोः कुशलवयोर्द्वादशजन्म संवत्सरस्य सङ्ख्यामङ्गलग्रन्थिरभिवर्त्तते; तदात्मनः पुराण श्वशुरमेतावतो मानवस्य राजर्षिवंशस्य प्रसवितारं सवितार मपहतपाप्मानं देवं, स्वहस्तावचितैः पुष्पैरुपतिष्ठस्वेति। ननु त्वामवनिपृष्ठवर्त्तिनीमस्मत्प्रभावाद्वनदेवता अपि न द्रक्ष्यन्ति कं पुनर्मर्त्याः। अहञ्च ज्ञापिता तमसे; त्वयि प्रकृष्टप्रेमैव बधू र्वत्सा जानकीति, अतस्त्वमेवास्याः प्रत्यन्तरीभवेति; साहमधुना यथादिष्टमनुतिष्ठामि।

मुर। अहमप्यमुं वृत्तान्तं भगवत्यै लोपामुद्रायै निवे दयामि; रामभद्रोऽप्यागत एवेत्याशङ्क्यते।

तम। तदियं, गोदावरीह्रदान्निष्क्रम्य

परिपाण्डुदुर्व्वलकपोलसुन्दरं

दधती विलोलकवरीकमाननं,

करुणस्य मूर्त्तिरथ, वा शरीरिणी,

विरहव्यथेव वनमेति जानकी।

मुर। इयं हि सा।

किसलयमिव मुग्धं बन्धनाद्विप्रलूनं।

हृदयकुसुमशोषी दारुणो दीर्घशोकः।

ग्लपयति परिपाण्डु क्षाममस्याः शरीरं।

शरदिज इव घर्म्मः केतकीगर्भपत्रं।

तम। उचितमेव दाक्षिण्यं स्नेहस्य; सञ्जीवनोपायस्तु मौलिकएव रामभद्रस्याद्य सन्निहित:।

मुर। कथमिव?

तम। श्रूयतां; पुरा किल वाल्मीकितपोवनोपकण्ठात् परित्यज्य, गते लक्ष्मणे, सीता देवी प्राप्तप्रसववेदनात्मानमति दुःखसंवेगाद्गङ्गाप्रवाहे निक्षिप्तवती।

मुर। तदैव, तत्र दारकद्वयं प्रसूता भगवतीभ्यां पृथ्वी भागीरथीभ्यामभ्युपपन्ना रसातलञ्च नीता; स्तन्यत्यागात् परेण च, सुतद्वयं तस्याः, प्राचेतसस्य महर्षेर्गङ्गादेवी स्वयमर्पितवती।

ईदृशानां विपाकोऽपि जायते पावनाद्भुतः,
यत्रोपकरणीभावमायात्येवंविधो जनः।

तम। इदानीन्तु शम्बूकवधवृत्तान्तेनानेन सम्भावितजनस्थानगमनं रामभद्रं सरयूमुखादुपश्रुत्य, भागीरथी, यदेव भगवत्या लोपामुद्रया स्नेहादाशङ्कितं, तदेवाशङ्क्य, सीतासमेता केनचिदिव गृहाचारव्यपदेशेन गोदावरीं विलोकयितुमागता।

मुर। सुविचिन्तितं भगवत्या; राजधानीस्थितस्य खलु तस्तैर्जगतामाभ्युदयिकैः कार्य्यैर्व्याप्तस्य रामभद्रस्य नियताश्चित्तविक्षेपाः; अव्यग्रस्य पुनरस्य शोकमात्रद्वितीयस्य पञ्चवटीप्रवेशो महाननर्थइति; तत्कथमिदानीं सीतादेव्या रामभद्र आश्वासनीयः स्यात्।

तम। उक्तमद्य भगवत्या भागीरथीदेव्या; वत्से, देवय जनसम्भवे सीते, अद्य खल्वायुष्मतोः कुशलवयोर्द्वादशजन्म संवत्सरस्य सङ्ख्यामङ्गलग्रन्थिरभिवर्त्तते; तदात्मनः पुराण श्वशुरमेतावतो मानवस्य राजर्षिवंशस्य प्रसवितारं सवितार मपहतपाप्मानं देवं, स्वहस्तावचितैः पुष्पैरुपतिष्ठस्वेति। ननु त्वामवनिपृष्ठवर्त्तिनीमस्मत्प्रभावाद्वनदेवता अपि न द्रक्ष्यन्ति कं पुनर्मर्त्याः। अहञ्च ज्ञापिता तमसे; त्वयि प्रकृष्टप्रेमैव वधू र्वत्सा जानकीति, अतस्त्वमेवास्याः प्रत्यन्तरीभवेति; साहमधुना यथादिष्टमनुतिष्ठामि।

मुर। अहमप्यमुं वृत्तान्तं भगवत्यै लोपामुद्रायै निवे दयामि; रामभद्रोऽप्यागत एवेत्याशङ्क्यते।

तम। तदियं, गोदावरीह्रदान्निष्क्रम्य

परिपाण्डुदुर्व्वलकपोलसुन्दरं
दधती विलोलकवरीकमाननं,
करुणस्य मूर्त्तिरथ, वा शरीरिणी,
विरहव्यथेव वनमेति जानकी।

मुर। इयं हि सा।

किसलयमिव मुग्धं बन्धनाद्विप्रलूनं।
हृदयकुसुमशोषी दारुणो दीर्घशोकः।
ग्लपयति परिपाण्डु क्षाममस्याः शरीरं।
शरदिजइव घर्म्मः केतकीगर्भपत्रं।

॥ परिक्रम्य निष्क्रान्ते ॥ विष्कम्भकः ॥

॥ नेपथ्ये ॥ प्रमादः ;

॥ ततः प्रविशति पुष्पावचयव्यग्रहस्ता सकरुणौत्सुक्यमाकर्णयन्ती सीता ।

सीता। अह्महे, जाणामि पिअसही मे वासन्दी वाहरदि (१)।

॥ नेपथ्ये ॥

सीतादेव्याः स्वकरकलितैः शल्लकीपल्लवाग्रै
रग्रे लोलः करिकरभको यः पुरा पोषितोऽभूत्!

सीता। किं ततः?

॥ पुनर्नेपथ्ये ॥

बध्वा सार्द्धं पयसि विहरन्, सोऽयमन्येन वेगा
दुद्दामेन द्विरदपतिना सन्निपत्याभियुक्तः।

सीता ॥ ससंभ्रमं कतिचित् पदानि दधती ॥ अज्जउत्त, परित्ताहि, परित्ताहि, मम तं पुत्तअं विचिन्त्य। हद्धी, हद्धी; ताइं ज्जेव चिरपरिचिदाइं अक्खराइं पञ्चवटीदंसणेण मं मन्दभाइणीं अणुबन्धन्ति; हा अज्जउत्त ॥इति मूर्च्छति॥(२)।

(१) आश्चर्य्यं; जानामि प्रियसखी मे वासन्ती व्याहरति।

(२) आर्य्यपुत्र, परित्रायस्व, परित्रायस्व, मम तं पुत्रकं विचिन्त्य। हा धिक्, हा धिक्, तान्येव चिरपरिचितान्यक्षराणि पञ्चवटीदर्शनेन मां मन्दभागिनीं अनुबध्नन्ति; हा आर्य्यपुत्र।

॥ प्रविश्य तमसा ॥ वत्से समाश्वसिहि, समाश्वसिहि।

नेपथ्ये। अयि विमानराज, अत्रैव स्थीयतां।

सीतां ॥ ससाध्वसोत्कम्पोल्लासं ॥ अम्महे, जलभरिदमेहत्थ णिदगम्भीरमंसलो कुदो णु एसो भारदी णिग्घोसभरन्तकस्स विवरं मंपि मन्दभाइणीं झत्ति उस्सावेदि (१)?

तम ॥ सस्नेहास्रं ॥

किमव्यक्तेऽपि निनदे कुतस्ते प्रीतिरीदृशी,
स्तनयित्नोर्मयूरीव चकितोत्कण्ठिता स्थिता।

सीता। भअवदि, किं भणासि, अपरिप्फुटत्ति मए उण सरसञ्जोएण पच्चभिआणिदं, अज्जउत्तो ज्जेव वाहरदि (२)।

तम। श्रूयते तपस्यतः शूद्रस्य दण्डधारणार्थमैक्ष्वाको राजा जनस्थानमागतइति।

सीता। दिट्ठिआ अपरिहीणराअधम्मो क्खु सो राआ (३)।

---

(१) जलभृतमेघस्तनितगम्भीरमांसलः कुतो नु एष भारती निर्घोषभ्रियमाणकर्णविवरां मामपि मन्दभाग्यां झटित्युच्छ्वासयति।

(२) भवति, किं भणसि, अपरिस्फुटमिति मया पुनः स्वरसंयोगेन प्रत्यभिज्ञातं आर्य्यपुत्र एव व्याहरति।

(३) दिष्ट्या अपरिहीनराजधर्म्मः खलु स राजा।

नेपथ्ये ॥

यत्र द्रुमा अपि मृगा अपि बन्धवो मे,
यानि प्रियासहचरश्चिरमध्यवात्सं ;
एतानि तानि बहुनिर्झरकन्दराणि,
गोदावरीपरिसरस्य गिरेस्तटानि ।

सीता। हा कधं पभादचन्दमण्डलावण्डुरपरिक्खामदुव्वलेण आआरेण; अअं सोम्मगम्भीराणुभावमत्तपच्चभिआणिओ, अज्जउत्तो, ज्जेव ; ता मं धारेहि (१)

॥ इति तमसामाश्लिष्य मूर्च्छति ॥

तम ॥ धारयन्ती ॥ वत्से, समाश्वसिहि, समाश्वसिहि ।

॥ नेपथ्ये ॥ अनेन पञ्चवटीदर्शनेन

अन्तर्लीनस्य दुःखाग्नेरद्योद्दामं ज्वलिष्यतः,
उत्पीडइव धूमस्य, मोहः प्रागावृणोति मां ।

तम ॥ स्वगतं ॥ इदं तदाशङ्कितं गुरुजनेनापि ।

सीता ॥ समाश्वस्य, ॥ हा कधं एदं ।

॥ पुनर्नेपथ्ये ॥ हा देवि, दण्डकारण्यवासप्रियसखि, हा देवि, विदेहराजपुत्रि ॥ इति मूर्च्छति ॥

---

(१) हा कथं प्रभातचन्द्रमण्डलापाण्डुरपरिक्षामदुर्व्वलेनाकारेणायं सौम्यगम्भीरानुभावमात्रप्रत्यभिज्ञात, आर्य्य पुत्र, एव ; तस्मान्मां धारय ।

सीता। हद्धी, हद्धी; मं मन्दभाइणिं उद्दिसिअ, आमील न्तणेत्तणीलुप्पलो मुच्छिदो ज्जेव्व हा। हा, कधं धरणीवट्टे णिरुस्सासणीसहं विपहत्थो। भअवदि तमसे, परित्ताअहि, परित्ताअहि; जीवावेहि, जीवावेहि अज्जउत्तं॥ इति पादयोः पतति॥ (१)।

तम। त्वमेव ननु कल्याणि सञ्जीवय जगत्पतिं;

प्रियस्पर्शो हि पाणिस्ते, तत्रैव निरतो जनः

सीता। जं भोदु, तं भोदु; जधा भअवदी भणादि (२।

॥ ससंभ्रमं निष्क्रान्ता ॥

॥ ततः प्रविशति भूमौ निपतितः, सास्रया सीतया स्पृश्य मानः, साह्लादोच्छ्वासो, रामभद्रः॥

सीता ॥ किञ्चित्सहर्षस्वगतं॥ जाणे पुणोवि पच्चागदं विअ जीविदं तेल्लोकणाहस्स (३)

रामः। हन्त भोः किमेतत्!

---

(१) हा धिक् हा धिक्, मां मन्दभागिनीमुद्दिश्य, आमीलन्नेत्रनीलोत्पलो मूर्च्छित एव। हा हा; कथं धरणीपृष्ठे निरुच्छ्वासनिस्सहं विपर्य्यस्तः। भगवति तमसे, परित्रायस्व, परित्रायस्व, जीवय, जीवयार्य्यपुत्रं।

(२) यद्भवतु, तद्भवतु; यथा भगवती भणति।

(३) जाने पुनरपि प्रत्यागतमिव जीवितं त्रैलोक्य नाथस्य।

प्रश्चोतनन्तु हरिचन्दनपल्लवानां
निष्पीडितेन्दुकरकन्दलजोनुसेकः,
आतप्तजीवितमनःपरितर्पणो मे
सञ्जीवनौषधिरसो नु हृदि प्रसिक्तः।
स्पर्शः, पुरा परिचितो, नियतं स एष
सञ्जीवनस्य मनसः, परिमोहनस्य;
सन्तापजां सपदि यः प्रतिहृत्य मूर्छा
मानन्दनेन जडतां पुनरातनोति।

सीता ॥ ससाध्वसोत्कम्पमुपसृत्य ॥ एत्तिकंज्जेव्व मे दाणिं वड्डदरं (१)।

रामः ॥ उपविश्य ॥ न खलु वत्सलया सीतादेव्या अभ्युपपन्नोऽस्मि?

सीता। हद्धी हद्धी, किन्ति; मं अज्जउत्तो मग्गिस्सदि (२)।

रामः। भवतु; पश्यामि।

सीता। भअवदि तमसे, ओसरह्म; जइ दाव मं पेक्खिस्सदि, तदो अणब्भणुण्णादसंणिधाणेण अहिअं पि मम महाराओ कुप्पिस्सदि (३)।

---

(१) एतावदेव मे इदानीं वड्डतरं।

(२) किमिति, मामार्य्यपुत्रो मार्गिष्यति।

(३) भगवति तमसे, अपसरावः; यदि तावत् मां प्रेक्षिष्यते ततोऽनभ्यनुज्ञातसन्निधानेनाधिकमपि मम राजा कुपिष्यति।

तमसा। अयि वत्से, भागीरथीवरप्रसादाद्वनदेवतानामप्य संदृश्या संवृत्तासि।

सीता। अां अत्थि एदं?(१)

रामः। प्रिये जानकि, नन प्रिये जानकि।

सीता ॥ समन्युगद्गदं॥ अज्जउत्त, असरिसं क्खु एदं इमस्स वुत्तन्तस्स सासं ॥ अहवा, किंत्ति वज्जमईं जम्मन्तरेसुवि पुणो असम्भाविददुल्लहदंसणं मं ज्जेव्व मन्दभाइणीमुद्दिसिअ,वच्छलस्स एवंवादिणो अज्जउत्तस्स उअरि, कधं णिरणुक्कोसा भविस्सं? अहं एदस्स हिअअं जानामि, ममावि एसोत्ति (२)।

रामः ॥ सर्व्वतो विलोक्य सनिर्वेदं ॥ हा न कश्चित्।

सीता। भअवदि तमसे, तदा णिक्कारणपरिच्चाइणोवि एदस्स, एदिणा एवंविधेण दंसणेण, कीदिसो विअ मे हिअआ णुबन्धोत्ति, ण आणामि, ण आणामि (३)।

---

(१) अां अस्त्येतत्।

(२) आर्य्यपुत्र, असदृशं खल्वेतदेतस्य वृत्तान्तस्य। अथवा, किमिति वज्रमयीं जन्मान्तरेष्वपि पुनरसम्भावितदुर्लभदर्शनां मामेव मन्दभागिनीमुद्दिश्य, वत्सलस्यैवंवादिन आर्य्यपुत्रस्योपरि, कथं निरनुक्रोशा भविष्यामि? अहमेतस्य हृदयं जानामि, ममाप्येष इति।

(३ भगवति तमसे, तदा निष्कारणपरित्यागिनोऽप्येत

तम। जानामि वत्से, जानामि।

तटस्थं नैराश्यादपि च कलुषं विप्रियवशा
द्वियोगे दीर्घेऽस्मिन्, झटिति घटनोत्तम्भितमिव;
प्रसन्नं सौजन्यादपि तु करुणैर्गाढकरुणं,
द्रवीभूतं प्रेम्णा तव हृदयमस्मिन् चणइव।

रामः। देवि।

प्रसादइव मूर्त्तस्ते स्पर्शस्नेहार्द्रशीतलः;
अद्याप्येवार्द्रयति मां; त्वं पुनः क्वासि नन्दिनि?

सीता। एदे क्खु दे अगाधदंसिदसिणेहसंभारा आणंद णिस्संदिणो सुदा मए अज्जउत्तस्स उल्लावा, जाणं पच्चएण, णिक्कारणपडिच्चाअसिल्लिदो वि वज्जमदो मे जम्मलाओ (१)।

रामः। अथवा कुतः प्रियतमा? नूनं सङ्कल्पाभ्यासपाटवोत्पादितएष रामभद्रस्य भ्रमः!

॥ नेपथ्ये॥ प्रसादः प्रसादः॥ सीता देव्याः स्वकरकलितैरित्यर्द्धं पठ्यते।

तस्यैवंविधेन दर्शनेन, कीदृशइव हृदयानुबन्धइति, न जानामि।

(१) एते खलु ते अगाधदर्शितस्नेहसम्भाराः आनन्दनिष्यन्दिनः श्रुता मया आर्य्यपुत्रस्योल्लापा, येषां प्रत्ययेन, निष्कारणपरित्यागश्लिष्टितोऽपि वज्रमतो मे जन्मलाभः।

रामः ॥ सकरुणौत्सुक्यं ॥ किं तस्य?

॥ पुनर्नेपथ्ये ॥ बध्वा सार्द्धमित्युत्तराङ्गं पच्यते।

सीता। को दाणिं अहिउज्झिस्सदि? (१)।

रामः। कासौ, कासौ दुरात्मा, यः प्रियायाः पुत्रकं वधूद्वितीयमभिभवति ॥ इत्युत्तिष्ठति॥

॥ प्रविश्य संभ्रान्ता वासन्ती ॥ कथं, देवो रघुनन्दनः।

सीता। कधं, पिअसही मे वासन्दी (२)।

वासन्तिका। जयति जयति देवः।

रामः ॥ निरूप्य ॥ कथन्देव्याः प्रियसखी वासन्ती।

वासं। देव, त्वर्य्यतां, त्वर्य्यतां। इतो जटायुगिरिशिखरस्य दक्षिणेन, सीतातीर्थेन, गोदावरीमवतीर्य्य सम्भावयतु देव्याः पुत्रकं देवः।

सीता। हा ताद, जटाओ, सुण्णं तए विणा जणट्ठाणं (३)।

रामः। अहह हृदयमर्म्मच्छिदः खल्वमी कथोद्घाताः।

वासं। इतइतो देवः।

सीता। भअवदि, सच्चकं ज्जेव, वणदेवदा वि मं ण पेक्खदि (४)।

---

(१) क इदानीं अभिमोच्यते?

(२) कथं प्रियसखी मे वासन्ती।

(३) हा तात, जटायो, शून्यं त्वया विना जनस्थानं।

(४) सत्यं, वनदेवतापि न मां प्रेक्षते।

तम। अयि वत्से, सर्व्वदेवताभ्यः प्रकृष्टमैश्वर्य्यं मन्दाकिनी देव्याः, तत्किमाशङ्कसे?

सीता। तदो अणुसरह्म ॥ इति परिक्रामतः ॥ (१)

रामः। भगवति गोदावरि, नमस्ते।

वासं। देव, देव, ादस्ख, विजयिना बधूद्वितीयेन देव्याः पुत्रकेण।

रामः। विजयतां आयुष्मन्।

सीता। अह्महे, ईदिसो एस संवुत्तो (२)।

रामः। महादेवि, दिष्ट्या वर्द्धसे।

येनोद्गच्छद्विसकिसलयस्निग्धदन्तांकुरेण,
व्याकृष्टस्ते, सुतनु, लवलीपल्लवः कर्णपूरात्,
सोऽयं पुत्रस्तव मदमुचां वारणानां विजेता,
यत्कल्याणं वयसि तरुणे भाजनं तस्य जातः।

सीता। अविउत्तो दाणीं अअं दीहाऊ इमाए सोम्मदंसणाए समं भोदु (३)।

रामः। सखि वासन्ति, पश्य पश्य, कान्तानुवृत्तिचातुर्य्यमप्यनुशिचितं वत्सेन।

---

(१) ततो ऽनुसरावः।

(२) आश्चर्य्यं, ईदृष एष सम्वृत्तः।

(३) अवियुक्त इदानीमयं दीर्घायुरनया सौम्यदर्शनया समं भवतु।

लीलोत्खातमृणालकाण्डकवलच्छेदेषु सम्पातिता,
पुष्यत्पुष्करवासितस्य पयसो गण्डूषसंक्रान्तयः;
सेकः शीकरिणा करेण विहितः कामं विरामे पुन
र्यत्स्नेहादनरालनालनलिनीपत्रातपत्रं धृतं।

सीता। भअवदि तमसे, अअन्दाव ईदिसो, दे उण ण आ णामि कुसलवा एत्तिकेन कालेन कीदिसाविअ होन्ति (१)।

तम। यादृशोऽयं, तादृशौ तावपि।

सीता। ईदिसी अहं मन्दभाइणी, जाए ण केवलं णिरन्तरं अज्जउत्तविरहो, पुत्तविरहोवि (२)।

तम। भवितव्यतेयमीदृशी।

सीता। किं वा मए पसूदाए, जेण तादिसं पि मम पुत्त काणं ईसिविरलकोमलधवलदसणुज्जलकपोलं अणुबद्धमुद्ध काअलीविहसिदं णिबद्धकाकसिहण्डअं अमलमुहपुण्डरीअ जुअलं, ण परिचुम्बिअं अज्जउत्तेण (३)।

---

(१) भगवति तमसे, अयं तावदीदृशस्तौ पुनर्न जानामि कुशलवावेतावता कालेन कीदृशाविव भवतः।

(२) ईदृशी अहं मन्दभागिनी, यस्या न केवलं निरन्तर मार्य्यपुत्रविरहः, पुत्रविरहोऽपि।

(३) किम्वा मया प्रसूतया, येन तादृशमपि मम पुत्रयो

तम। अस्तु देवताप्रसादात्।

सीता। भअवदि तमसे, एदिणा अवच्चसंसुमरणेण उस्सुसिद पण्हुदत्थणी, ताणं च पिदुणो सणिधाणेण खणमत्तं संसारि णिह्मि संवुत्ता (१)।

तम। किमत्रोच्यते। प्रसवः खलु प्रकर्षपर्य्यन्तः स्नेहस्य परमं, चैतदन्योन्यसंश्लेषणं पित्रोः।

अन्तःकरणतत्त्वस्य दम्पत्योः स्नेहसंश्रयात्,
आनन्दग्रन्थिरेकोऽयमपत्यमिति बध्यते।

वासं। इतोऽपि देवः पश्यतु।

अतरुणमदताण्डवोत्सवान्ते
व्ययमचिरोद्गतमुग्धलोलवर्हः,
मणिमुकुट इवोच्छिखः कदम्बे
नदति स एष वधूसखः शिखण्डी।

रोषद्विरलकोमलधवलदशनोज्ज्वलकपोलमनुबद्धमुग्ध काकलीविहसितं निबद्धकाकशिखण्डकममलमुखपुण्डरीकयुगलं, न परिचुम्बितमार्य्यपुत्रेण।

(१) भगवति तमसे, एतेनापत्यसंस्मरणेण उच्छ्वसित प्रस्नुतस्तनी, तयोश्च पितुः सन्निधानेन क्षणमात्रं संसारिण्यस्मि सम्वृत्ता।

सीता ॥ सकौतुकास्रं ॥ एसो सो, एसो सो (१)।

रामः। वत्स मोदस्व।

सीता। एवं भोदु।

रामः। भ्रमिषु कृतपुटान्तर्मण्डलावृत्तचक्षुः,
प्रचलितचतुरभ्रूताण्डवैर्मण्डयन्त्या,
करकिसलयतालैर्मुग्धया नर्त्यमानं,
सुतमिव मनसा त्वां वत्सलेन स्मरामि।

हन्त तिर्य्यञ्चोऽपि परिचयमनुरुध्यन्ते।

कतिपयकुसुमोद्गमः कदम्बः
प्रियतमया परिवर्द्धितो य आसीत्।

सीता ॥ निरूप्य सास्रं॥ सुट्ठु पच्चभिआणिदं अज्जउत्तेण (२)।

रामः। स्मरति गिरिमयूर एष देव्याः
स्वजनइवात्र यतः प्रमोदमेति।

वासं। अत्र तावदासनपरिग्रहं करोतु देवः।

एतत्तदेव कदलीवनमध्यवर्त्ति
कान्तासखस्य शयनीयशिलातलन्ते।
अत्र स्थिता तृणमदाद्बहुशो यदेभ्यः,
सीता, ततो हरिणकैर्न विमुच्यते स्म।

---

(१) एष सः एष सः।

(२) सुष्ठु प्रत्यभिज्ञातमार्य्यपुत्रेण।

रामः। इदं तावदशक्यमेव द्रष्टुम् इत्यन्यतो रुदन्नुपाविशति॥

सीता। सहि वासंदि, किं तए कदं अज्जउत्तस्स, मम च एदं दंसअन्तीए। हद्धी हद्धी, सोज्जेव अज्जउत्तो, तंज्जेव पञ्चवटीवणं, साज्जेव पञ्चवटी, साज्जेव वासन्दी, तेज्जेव विविहविस्सम्भसाक्खिणो गोदावरीकाणणुद्देसा, तेज्जेव जादणिव्विसेसा मअपक्खिपादवा, साज्जेव चाहं; मए उण मन्दभाइणीए दीसन्तंपि सव्वंज्जेव एदं णत्थिति; ता ईदिसो जीअलोअस्स परिवत्तो (१)।

वासं। सखि सीते, कथं न पश्यसि रामस्यावस्थां।

कुवलयदलस्निग्धैरङ्गैर्ददौ नयनोत्सवं
सततमपि ते स्वेच्छादृश्यो नवो नवएव यः,
विकलकरणः पाण्डुः सोऽयं शुचा परिदुर्ब्बलः,
कथमपि सइत्युन्नेतव्यस्तथापि दृशोः प्रियः।

---

(१) सखि वासन्ति, किं त्वया कृतं आर्य्यपुत्रस्य मम चैतद्दर्शयन्त्या। हा धिक्, हा धिक्, स एवार्य्यपुत्रः, तदेव पञ्चवटीवनं, सैव वासन्ती, तएव विविधविस्रम्भसाक्षिणो गोदावरीकाननोद्देशास्तएव जातनिर्विशेषा मृगपक्षिपादपाः, सा चैवाहं; मम पुनर्मन्दभाग्याया दृश्यमानमपि सर्व्वमेवैतन्नास्तीति; तदीदृशो जीवलोकस्य परिवर्त्तः।

सीता। पेक्खामि, सहि, पेक्खामि (१)।

तम। सखि पश्यन्ती प्रियं भूयाः।

सीता। हा देव्व, एसा मए विणा, अहं पि एदेण विणेत्ति, सिविणेवि केण सम्भाविदं आसि। ता मुहुत्तकं पि, जम्मान्तरादो विअ अणुलद्धदंसणा, वाहसलिलंतरेसु पेक्खामि दाव वच्छलं अज्जउत्तं॥ इति पश्यति॥ (२)

तम॥ सस्नेहास्रं परिष्वज्य॥

विलुलितमतिपूरैर्वाष्पमानन्दशोक
प्रभवमवसृजन्ती तृष्णयोत्तानदीर्घा,
स्नपयति हृदयेशं स्नेहनिस्यन्दिनी ते,
धवलवहलमुग्धा दुग्धकुल्येव दृष्टिः।

वासं। ददतु तरवः पुष्पैरर्घं फलैश्च मधुच्युतः,
स्फुटितकमलामोदप्रायाः प्रवान्तु नवानिलाः,
कलमविरलं रत्युत्कण्ठाः क्वणन्तु शकुन्तयः,
पुनरिदमयं देवो रामः स्वयं वनमागतः।

---

(१) प्रेक्षे, सखि, प्रेक्षे।

(२) हा दैव एष मया विना अहमप्येतेन विनेति, स्वप्नेऽपि केन सम्भावितमासीत्। तन्मुहूर्त्तकमपि, जन्मान्तरादिव अनुलब्धदर्शना, वाष्पसलिलान्तरेषु प्रेक्षे तावद्वत्सलमार्य्यपुत्रं।

रामः। एहि, सखि वासन्ति, नन्वितः स्थीयतां।

वासं॥ उपविश्य सास्रं॥ महाराज, अपि कुशलं कुमार लक्ष्मणस्य?

रामः॥ अश्रुतिमभिनीय॥

करकमलवितीर्णरम्बुनीवारशष्पै
स्तरुशकुनिकुरङ्गान् मैथिली यानपुष्यत्,
भवति मम विकारस्तेषु दृष्टेषु कोऽपि,
द्रवइव हृदयस्य प्रस्तरोद्भेदयोग्यः।

वासं। महाराज, ननु पृच्छामि, अपि कुशलं कुमार लक्ष्मणस्येति।

रामः ॥ स्वगतं॥ अये महाराजेति निष्प्रणयमामन्त्रण पदं, सौमित्रिमात्रे च वाष्पस्खलिताक्षरः कुशलानुप्रश्नस्तथा मन्ये विदितसीतावृत्तान्तेयमिति॥ प्रकाशं॥ आः कुशलं कुमारस्येति॥ रोदिति॥

वासं। अयि देव, किमिति दारुणो, दारुणः खल्वसि।

सीता। सहि वासन्दि, किंतुमं सि एवंवादिणी; पिआरुहो क्खु सव्वस्स अज्जउत्तो विसेसदो मम पिअसहीए (१)।

---

(२९) सखि वासन्ति, किमसि एवंवादिनी; प्रियार्हः खलु सर्व्वस्यार्य्यपुत्रो विशेषतो मम प्रियसख्याः।

वासं। त्वं जीवितं, त्वमसि मे हृदयं द्वितीयं,
त्वं कौमुदी नयनयोरमृतं त्वमङ्गे।
इत्यादिभिः प्रियशतैरनुरुध्य मुग्धां;
तामेव शान्तमथवा किमिहोत्तरेण?

॥ इति मूर्छति ॥

रामः। स्थाने, खलु वाक्यनिवृत्तिर्मोहस्य, सखि। समाश्वसिहि, समाश्वसिहि।

वासं॥ समाश्वस्य॥ तत्किमिदमकार्य्यमनुष्ठितं देवेन?

सीता। सहि वासन्दि विरम (१)।

रामः। लोको न मृष्यतीति।

वासं। तत्कस्य हेतोः।

रामः। सएव जानाति किमपि।

तम। चिरादुपालम्भः।

वासं। अयि कठोर यशः किल ते प्रियं,
किमयशो ननु घोरमतः परं;
किमभवद्विपिने हरिणीदृशः;
कथय नाथ, कथं वत मन्यसे?

सीता। तुमंज्जेव, सहि वासंदी, दारुणा कठोरा अ, जा एवं पलीविसि (२)।

---

(१) सखि वासन्ति विरम।

(२) त्वमेव सखि, दारुणा कठोरा च, या एवं प्रदीपयसि।

तम। प्रणयएवायं व्याहरति शोकस्य।

रामः। सख, किमत्र मन्तव्यं।

त्रस्तैकहायनकुरङ्गविलोलदृष्टे
स्तस्याः परिस्फुरितगर्भभरालसायाः,
ज्योत्स्नामयी च मृदुमुग्धमृणालकल्पा
क्रव्याद्भिरङ्गलतिका नियतं प्रलुप्ता।

सीता। अज्जउत्त, धरामि, एसा धरामि (१)।

रामः। हा प्रिये जानकि, क्वासि।

सीता। हद्धी, हद्धी, अज्जउत्तोवि प्पमुक्ककण्ठं रुसो (२)।

तम। वत्से, सांप्रतिकमेवैतत् कर्त्तव्यानि दुःखितैर्दुःख निर्व्वापणानि, यतः।

पूरोत्पीडे तडागस्य परीवाहः प्रतिक्रिया,
शोकक्षोभे च हृदयं प्रलापैरेव धार्य्यते।

विशेषतो रामभद्रस्य वज्रतरप्रकारकष्टो जीवलोकः।

इदं विश्वं पाल्यं विधिवदभियुक्तेन मनसा,
प्रियाशोको जीवं कुसुममिव घर्म्मः क्लमयति;
स्वयं कृत्वा त्यागं, विलपनविनोदोऽप्यसुलभ
स्तदद्याप्युच्छ्वासो भवति, ननु लाभो विरुदितं।

रामः। कष्टं भोः कष्टं।

---

(१) आर्य्यपुत्र धरामि एषा धरामि।

(२) हा धिक्, हा धिक्, आर्य्यपुत्रोऽपि प्रमुक्तकण्ठं रुदितः।

दलति हृदयं गाढोद्वेगो, द्विधा तु न भिद्यते;
वहति विकलः कायो मोहं, न मुञ्चति चेतनां;
ज्वलयति तनूमन्तर्दाहः, करोति न भस्मसात्;
प्रहरति विधिर्म्मर्म्मच्छेदी, न क्रन्तति जीवितं।

सीता। एवम्मेदं।

रामः। हे भवन्तः पौरजानपदाः।

न किल भवतां स्थानं देव्या गृहेऽभिमतं, तत
स्तृणमिव वने शून्ये त्यक्ता, न वाप्यनुशोचिता
चिरपरिचितास्ते ते भावाः परिद्रवयन्ति मा
मिदमशरणैरद्याप्येवं प्रसीदत रुद्यते।

तम। अतिगम्भीरमवगूरणं शोकसागरस्य।

वासं। देव, अतिक्रान्ते धैर्य्यमवलम्ब्यतां।

रामः। सखि, किमत्रोच्यते धैर्य्यमिति।

देव्या शून्यस्य जगतो द्वादशः परिवत्सरः,
प्रणष्टमिव नामापि न च रामो न जीवति।

सीता। सोहिदम्हि अज्जउत्तस्स एदाहिं वअणेहिं (१)।

तम। एवं वत्से।

नैताः प्रियतमा वाचः स्नेहार्द्राः शोकदारुणाः,
एतास्ते मधुनो धाराश्च्योतन्ति सविषास्त्वयि।

---

(१) शोभितास्मि आर्य्यपुत्रस्यैतैर्वचनैः।

राम:। अयि खलु वासन्ति, मया

यथा तिरश्चीनमलातशल्यं प्रत्युप्तमन्तः सविषश्च दंश:,

तथैव तीव्रो हृदि शोकशङ्कुर्मर्म्माणि कृन्तन्नपि किन्न सोढ:।

सीता। एवंह्मि मन्दभाइणी पुणोवि आआसआरिणी अज्जउत्तस्स (१)।

राम:। एवमतिनिष्कम्पस्तम्भितान्तःकरणस्यापि मम, संस्तुतवज्ञतरप्रियदर्शनादुद्दामोऽयमावेग:।

लोलो लोलक्षुभितकरुणो जृम्भणस्तम्भनार्थं,
यो यो यत्नः कथमपि मया धीयते तन्तमन्त:;
भित्वा भित्वा प्रसरति बलात् कोऽपि चेतोविकार
स्तोयस्येवाप्रतिहतरयः सैकतं सेतुमोघ:।

सीता। एदिणा अज्जउत्तस्स दुव्वारदारुणारम्भेण दुःखसंक्खोहेण, प्पप्फुरिदणिअदुःखं विअ, आकंपिदं मे हिअअम् (२)।

---

(१) एवमस्मि मन्दभाग्या पुनःपुनरायासकारिणी आर्य्यपुत्रस्य।

(२) एतेनार्य्यपुत्रस्य दुर्व्वारदारुणारम्भेण दुःखसंक्षोभेण, प्रस्फुरितनिजदुःखमिवाकम्पितं मे हृदयं।

वासं॥ स्वगतं॥ कष्टमभ्यापन्नो देवः; तदन्यतः क्षिपामि तावत्॥ प्रकाशं॥ चिरपरिचितानामिदानीं जनस्थानभागानामवलोकनेनात्मानमानन्दयतु देवः।

रामः। एवमस्तु॥ इत्युत्थाय परिक्रामति॥

सीता। सन्दीवणाइं ज्जेव दुःखस्स पिअसही विणोदणोवाओत्ति मसेदि (१)।

वासं॥ सकरुणं॥ देव, देव;

अस्मिन्नेव लतागृहे त्वमभवस्तन्मार्गदत्तेक्षणः,
सा हंसैः स्थिरकौतुका चिरमभूद्गोदावरीरोधसि;
आयान्त्या परिदुर्मनायितमिव त्वां वीक्ष्य, बद्धस्तया,
कातर्यादरविन्दकुड्मलनिभो मुग्धः प्रणामाञ्जलिः।

सीता। दारुणासि, वासन्दि, दारुणासि; जा एदेहिं हिअअमम्मगूढसल्लसरिसेहिं पुणो पुणो मं मन्दभाइणीं अज्ज उत्तं वि दूमावेसि (२)।

---

(१) सन्दीपनान्येव दुःखस्य प्रियसखी विनोदनोपाय इति मन्यते।

(२) दारुणासि, वासन्ति, दारुणासि. या एतैर्हृदयमर्म्म; गूढशल्यसदृशैः पुनः पुनर्मां मन्दभाग्यां आर्य्यपुत्रमपिदुनोषि।

रामः। चण्डि जानकि, इतस्ततो दृश्यसइव, नचानुकम्पसे।

हा हा देवि, स्फुटति हृदयं, ध्वंसते देहबन्धः,
शून्यं मन्ये जगदविरतं ज्वालमन्तर्ज्वलामि;
सीदन्नन्धेतमसि विधुरो मज्जतीवान्तरात्मा
विष्वङ्मोहः स्थगयति, कथं मन्दभाग्यः करोमि।

॥ इति मूर्च्छति ॥

सीता। हद्धी, हद्धी; पुणोवि प्पमूढो अज्जउत्तो (१)।

वासं। देव समाश्वसिहि, समाश्वसिहि।

सीता। हा अज्जउत्त; मं मन्दभाइणीं उद्दिसिअ, सअलजीअलोअमङ्गलाधारस्स दे जम्मलाहस्स वारंवारं संसइदजीविददारुणो दसापरिणामोत्ति; हा हदह्मि (२)।

॥ इति मूर्च्छति ॥

तम। वत्से समाश्वसिहि समाश्वसिहि,। पुनस्तत्पाणिस्पर्श एव सञ्जीवनोपायो रामभद्रस्य।

वासं। कथमद्यापि नोच्छ्वसिति; हा प्रियसखि सीते, कासि; सम्भावयात्मनो जीवेश्वरं।

---

(१) हा धिक्, हा धिक्, पुनरपि प्रमूढ आर्य्यपुत्रः।

(२) हा आर्य्यपुत्त, मां मन्दभाग्यामुद्दिश्य, सकलजीवलोकमङ्गलाधारस्य ते जन्मलाभस्य वारंवारं संशयितजीवितदारुणो दशापरिणाम; इति हा हतास्मि।

॥ सीता ससंभ्रममुपसृत्य हृदि ललाटे च स्पृशति ॥

वासं। दिष्ट्या प्रत्यापन्नचेतनो रामभद्रः।

रामः। आलिम्पन्नमृतमयैरिव प्रलेपै

रन्तर्वा, वहिरपि वा, शरीरधातून्,

संस्पर्शः पुनरपि जीवयन्नकस्मा

दानन्दादपरविधं तनोति मोहं।

आनन्दनिमीलिताक्षएव; सखि वासन्ति, दिष्ट्या वर्द्धसे।

वासं। देव कथमिव?

रामः। सखि किमन्यत्; पुनः प्राप्ता जानकी।

वासं। अपि देव रामभद्र क सा?

रामः॥ स्पर्शसुखमनुभूय॥ पश्य, नन्वियं, पुरतएव,

वासं। अयि देव, किमिति मर्म्मच्छेददारुणैरतिप्रलापैः प्रिय सखीं दुःखदग्धामपि मां पुनर्म्मन्दभागिनीं दहसि।

सीता। ओसक्किदुमिच्छामि; एसो उण चिरसब्भावसोम्मसी अलेण अज्जउत्तफंसेण, दीहदारुणं विअ सन्तावं करन्तेण, वज्ज लेवोवणिबद्धोविअ; सिज्जन्तणीसहविपत्थत्थवेअणसीलो अवसो विअ मे हत्थो (१)।

---

(१) अपसर्त्तुमिच्छामि एष पुनश्चिरसद्भावसौम्यशीत लेनार्य्यपुत्रस्पर्शेन, दीर्घदारुणमिव सन्तापं कुर्व्वता, वज्रले

रामः। सखि, कुतः प्रलापाः।

गृहीतो यः पूर्व्वं परिणयविधौ कङ्कणधर
स्चिरं स्वेच्छास्पर्शैरमृतशिशिरैर्यः परिचितः,

सीता। अज्जउत्तो सोज्जेव्व दाणीं सि तुमं (१)।

रामः। स एवायं तस्यास्तुहिननिकरौपम्यसुभगो,
मया लब्धः पाणिर्ललितलवलीकन्दलनिभः।

॥ इति गृह्णाति ॥

सीता। हद्धी, हद्धी, अज्जउत्तफंससमोहिदाए प्पमादो क्खु संवुत्तो (२)।

रामः। सखि वासन्ति, आनन्दनिमीलितेन्द्रियः साध्वसेन परवानस्मि; तत्त्वं तावदेनामवधारय।

वासं। कष्टमुन्माद एव।

॥ सीता ससंभ्रममाक्षिप्यापसर्पति ॥

रामः। हा धिक् प्रमादः, हा धिक् प्रमादः;

पोपनिबद्ध इव, सृज्यमाननिःसहविपर्य्यस्तवेपनशीलोऽवश इव मे हस्तः।

(१) आर्य्यपुत्र स एवेदानीमसि त्वं।

(२) हा धिक्, हा धिक, आर्य्यपुत्रस्पर्शमोहितायाः प्रमादः खलु सवृत्तः।

करपल्लवः स तस्याः सहसैव जडात् जडः परिभ्रष्टः,
परिकम्पिनः प्रकम्पी करान्मम स्विद्यतः स्विद्यन्।

सीता। हद्धी हद्धी; अज्जवि अणवत्थिदत्थिमिदमूढघुसन्तणअणो ण पज्जवत्थावेदि अप्पाणअं (१)।

तम॥ सस्नेहं निर्वर्ण्य॥

सस्वेदरोमाञ्चितकम्पिताङ्गी जाता प्रियस्पर्शवशेन वत्सा,
मरुन्नवाम्भःप्रविधूतसिक्ता कदम्बयष्टिः स्फुटकोरकेव।

सीता। अम्महे, अवसेण एदेण अत्ताणएण लज्जाविदह्मि भअवदीए तमसाए; किंत्ति किल एसा मणिस्सदि; एसो परिच्चाओ, एसो अहिसंगोत्ति (२)।

रामः॥ सर्व्वतोऽवलोक्य॥ कथं नास्त्येव, नन्वकरुणे वैदेहि;

सीता। सच्चं अकरुणह्मि, जा एवंविधं तुमं पेक्खन्ती धरामिव्वेव जीअं (३)।

---

(१) अद्यापि अनवस्थितास्तिमितमूढघूर्णमाननयनो न पर्य्यवस्थापयति आत्मानं।

(२) विस्मये, अवशेनैतेनात्मना लज्जापितास्मि भगवत्यास्तमसायाः; किमिति किलैषा मंस्यते; एष परित्यागः एषोऽभिष्वङ्ग इति।

(३) सत्यमकरुणास्मि, या एवम्विधं त्वां प्रेक्षमाणा धराम्येव जीवं।

राम:। क्वासि; प्रसीद देवि; न मामेवंविधं परित्यक्तुमर्हसि।

सीता। अद् अज्ज उत्त विपरीतं विश्र (१)।

वासं। देव, प्रसीद, प्रसीद ॥ स्वेनैव लोकोत्तरेण धैर्य्येण संस्तम्भयातिभूमिंगतविप्रलम्भमात्मानं। कुतोऽत्र प्रियसखी मे सीता?

राम:। व्यक्तं नास्ति; कथमन्यथा वासन्त्यपि तां न पश्येत्; अपि खलु स्वप्नएष स्यात्। न चास्मि प्रसुप्त:; कुतो वा रामस्य निद्रा? सर्व्वथा स एवैष भगवाननेकवारपरिकल्पितनिर्म्मितो विप्रलम्भपुन:पुनरनुबध्नाति।

सीता। मएज्जेव दारुणाए विप्पलद्धो अज्जउत्तो (२)।

वासं। देव, पश्य, पश्य;

पौलस्त्यस्य जटायुषा विघटित: कार्ष्णायसोऽयं रथ:;
पश्यैते पुरत: पिशाचवदना: कङ्कालशेषा: खरा:;
खड्गच्छिन्नजटायुपक्षतिरित: सीतां ज्वलन्तीं वह
न्नन्तर्व्याकुलविद्युदम्बुद इव द्यामभ्युदस्थादरि:।

सीता ॥ सभयं॥ अज्जउत्त, तादो वावादीअदि, अहं च अवहरिआमि; परित्ताहि, परित्ताहि (३)।

---

(१) आर्य्यपुत्त विपरीतमिव।

(२) मयैव दारुणया विप्रलब्धआर्य्यपुत्त:।

(३) आर्य्यपुत्त, तातो व्यापाद्यते, अहञ्चापह्रिये, परित्रायस्व, परित्रायस्व।

रामः ॥ सवेगमुत्थाय ॥ आः पाप, तातप्राणसीतापहारिन्, क्व यासि।

वासं। अपि देव राघवकुलप्रलयधूमकेतो, अद्यापि ते मन्युविषयः।

सीता। अम्मो उम्मत्तिअसि संवुत्ता (१)।

रामः। अन्यथवायमधुना प्रलापो वर्त्तते।

उपायानां भावादविरतविनोदव्यतिकरै
र्विमर्द्दैर्वीराणां, जगति जनितात्यद्भुतरसः;
वियोगो मुग्धाक्ष्याः स खलु रिपुघातावधिरभूत्
कथं तूष्णीं सह्यो निरवधिरिदानीन्तु विरहः?

सीता। णिरवधित्ति; हा हदह्मि मन्दभाइणी (२)।

॥ इति रोदिति ॥

रामः। हा कष्टं।

व्यर्थं यत्र कपीन्द्रसख्यमपि मे, वीर्य्यं हरीणां वृथा,
प्रज्ञा जाम्बवतोऽपि, यत्र न गतिः पुत्रस्य वायोरपि,
मार्गं यत्र न विश्वकर्म्मतनयः कर्त्तुं नलोऽपि क्षमः,
सौमित्रेरपि पत्रिणामविषयस्तत्र प्रिये क्वासि मे?

---

(१) अहो उन्मत्तासि संवृत्ता।

(२) निरवधिरिति हा हतास्मि मन्दभागिनीति।

सीता। वज्ज मणाविदह्मि तं पुव्वविरहं (१)।

रामः। सखि वासन्ति, सुहृदामिदानीं दुःखायैव राम दर्शनं कियच्चिरं त्वां रोदयिष्यति; तदनुजानीहि मां गमनाय।

सीता॥ सोद्वेगमोहं तमसामवलम्ब्य॥ भअवदि तमसे, गच्छदि ज्जेव अज्जउत्तो (२)।

तम। वत्से, समाश्वसिहि समाश्वसिहि; नन्वावामप्यायुष्मतोः कुशलवयोर्व्वर्षवर्द्धनमङ्गलानि सम्पादयितुं भागीरथी पदान्तिकमेव गच्छावः।

सीता। भअवदि पसीद, खणमेत्तंपि दाव दुल्लहं जणं पेक्खामि (३)।

रामः। अस्ति चेदानीमश्वमेधाय सहधर्म्मचारिणी मे।

सीता॥ स्वगतं॥ अज्जउत्त, का?

रामः। हिरण्मयी सीतायाः प्रतिकृतिः।

सीता॥ सोच्छ्वासं सास्त्रं॥ अज्जउत्तो दाणीं सि तुमं अम्महे, उक्खाणिदं दाणीं मे परिच्चाअलज्जासल्लं अज्जउत्तेण (४)।

---

(१) वज्र मानायितास्मि तं पूर्व्वविरहं।

(२) भगवति तमसे, गच्छत्येवार्य्यपुत्त्रः।

(३) भगवति प्रसीद, क्षणमात्रमपि तावत् दुर्लभं जनं प्रेक्षे।

(४) आर्य्यपुत्त्र, इदानीमसि त्वं। उत्खातमिदानीं मे परित्यागलज्जाशल्यमार्य्यपुत्त्रेण।

रामः। तत्रापि तावद्बाष्पदिग्धं चक्षुर्विनोदयामि।

सीता। धण्णा सा जा अज्जउत्तेण वड्डमणाअदि ; जा अज्जउत्तं विणोदअन्ती, आसाणिबन्धणं जादा जीअलोअस्स (१)।

तम॥ सस्मितस्नेहास्रं परिष्वज्य॥ अयि वत्से, एवमात्मा स्तूयते।

सीता॥ सलज्जमधोमुखी स्वगतं॥ परिहसिदह्मि भअवदीए तमसाए (२)।

वासं। महानयं व्यतिकरोऽस्माकं प्रमादः ॥ गमनं प्रति॥ पुनर्य्यथा कार्य्यहानिर्न भवति, तथाऽस्तां।

सीता। पडिकूला दाणिं मे वासन्ती संवुत्ता (३)।

तम। वत्से एहि गच्छावः।

सीता॥ सकष्टं॥ एवं करेह्म (४)।

तम। कथं वा गम्यते? यस्यास्तव,

---

(१) धन्या सा यार्य्यपुत्त्रेण वड्ड मन्यते या आर्य्यपुत्त्रं विनोदयन्ती आशानिबन्धनं जाता जीवलोकस्य।

(२) परिहसितास्मि भगवत्या तमसया।

(३) प्रतिकूलेदानीं मे वासन्ती संवृत्ता।

(४) एवं कुर्व्वः

प्रत्युप्तस्येव दयिते तृष्णादीर्घस्य चक्षुषः,
मर्म्मच्छेदपरैर्यत्नैराकर्षो न समाप्यते।

सीता। णमो णमो अकिदपुण्णजणादंसणीआणं अज्जउत्त चरणकमलाणं(१)।

॥ इति मूर्च्छति॥

तम। वत्से, समाश्वसिहि, समाश्वसिहि।

सीता॥ समाश्वस्य॥ कियच्चिरं वा मेहन्तरेण पुण्णिमाचन्दस्स दंसणं(२)।

तम। अहो संविधानकं।

एको रसः करुणएव, निमित्तभेदा
द्भिन्नः, पृथक् पृथगिवाश्रयते विवर्त्तान्।
आवर्त्तबुद्बुदतरङ्गमयान्विकारा
नम्भो यथा सलिलमेव तु तत्समग्रं।

रामः। अयि विमानराज इतइतः॥ इति सर्व्वे उत्तिष्ठन्ति॥

॥ तमसावासन्त्यौ सीतारामौ प्रति॥

---

(१) नमो नमोऽकृतपुण्यजनादर्शनीययोरार्य्यपुत्त्रचरणकमलयोः।

(२) कियच्चिरं वा मेघान्तरेण पूर्णिमाचन्द्रस्य दर्शनं।

अवनिरमरसिन्धुः सार्द्धमस्मद्विधाभिः,
स च कुलपतिराद्यश्छन्दसां यः प्रयोक्ता,
स च मुनिरनुयातारुन्धतीको वशिष्ठ
स्त्वयि वितरतु भद्रं भूयसे मङ्गलाय ।

॥ इति निष्क्रान्ताः सर्व्वे ॥

॥ छाया नाम तृतीयाऽङ्कः ॥

अथ चतुर्थोऽङ्कः।

ततः प्रविशतस्तापसौ।

एकः। सौधातके, दृश्यतामद्य भूयिष्ठसंनिधापितातिथिजनस्य समधिकारम्भरमणीयता भगवतो वाल्मीकेराश्रमपदस्य ; तथाहि ;

नीवारौदनमण्डमुष्णमधुरं, सद्यः प्रसूताप्रिया,
पीतादप्यधिकं तपोवनमृगः पर्य्याप्तमाचामति।
गन्धेन स्फुरता मनागनुसृतो भक्तस्य सर्पिष्मतः,
कर्कन्धूफलमिश्रशाकपचनामोदः परिस्तीर्य्यते।

सौधा। आअदं अणज्झाअकारणं सविसेसभूदमज्ज जीसकुच्चाणं (१)।

प्रथमः॥ विहस्य॥ अपूर्व्वः कोऽपि बहुमानहेतुर्गुरुषु, सौधातके।

सौधा। भो भण्डाअण, किंणामधेओ एसो दाणीं महन्तस्स त्थविरसत्थस्स धुरन्धरो, अज्ज अदिधी आअदो (२)।

(१) आगतमनध्यायकारणं सविशेषभूतमद्य जीर्णकूर्च्चाणां।

(२) भो भाण्डायन, किन्नामधेय एष इदानीं महतः स्थविरसार्थस्य धुरन्धरश्चाद्यातिथिरागतः।

भाण्डायनः। धिक् प्रहसनं, नन्वयमृष्यश्टङ्गाश्रमादरुन्धतीपुरस्कृतान् महाराजदशरथस्य दारानधिष्ठाय, भगवान् वशिष्ठः प्राप्तस्तत्किमेवं प्रलपसि?

सैाधा। ऊं वसिट्ठो (१)।

भाण्डा। अथ किं।

सैाधा। मए उण जाणिदं वग्घो वा, विओ वा, एसोत्ति(२)।

भाण्डा। आं, किमुक्तं भवति?

सैाधा। तेण परावडिदेणज्जेव सा वराइआ कल्लोडिआ मडमडाइदा (३)

भाण्डा। समांसो मधुपर्कइत्याम्नायं बहु मन्यमानाः श्रोत्रियायाभ्यागताय वत्सतरीं, महोक्षं वा महाजं वा, निर्व्वपन्ति गृहमेधिनः। तं हि धर्म्मसूत्रकाराः समामनन्ति।

सैाधा। भो णिग्गहीदोसि (४)।

भाण्डा। कथमिव?

---

(१) ऊं वशिष्ठः।

(२) मया पुनर्ज्ञातं व्याघ्रोवा, वृकोवा, एष इति।

(३) तेन परापतितेनैव सा वराकिका वत्सतरी भक्षितेति।

(४) भो निगृहीतोऽसि।

सौधा। जेण आअदेसु वसिट्ठमिस्सेसु वत्सदरी विस सिदा; अज्ज ज्जेव पचागदस्स राएसिणो जणअस्स, भअवदा वम्मीएणवि दहिमऊहिंज्जेव णिव्वत्तिदो मदुवक्को, वत्सदरी उण विसज्जिदा (१)।

भाण्डा। अनिवृत्तमांसानामेवं कल्पमृषयो मन्यन्ते; निवृत्तमांसस्तु तत्रभवान् जनकः।

सौधा। किं णिमित्तं?

भाण्डा। स तदैव देव्याः सीतायास्तादृशं दैवदुर्व्विपाकमुपश्रुत्य वैखानसः संवृत्तः, तथास्य कतिपये संवत्सराश्चन्द्रद्वीपे तपोवने तपस्तप्यमानस्य।

सौधा। तदो किंति आअदो? (२)

भाण्डा। चिरन्तनप्रियसुहृदं प्राचेतसं द्रष्टुं।

सौधा। अवि अज्ज सम्बन्धिणीहिं समं संवुत्तं से दंसणं ण वेत्ति (३)!

भाण्डा। सम्प्रत्येव भगवता वशिष्ठेन देव्याः कौशल्यायाः सकाशं भगवत्यरुन्धती प्रहिता, यत् स्वयमुपेत्य वैदेहो द्रष्टव्य, इति वक्तुं।

---

(१) येनागतेषु वशिष्ठमिश्रेषु वत्सतरी विशसिता; अद्यैवागतस्य राजर्षेर्जनकस्य भगवता वाल्मीकिनापि दधिमधुभिरेव निर्वर्त्तितो मधुपर्कः, वत्सतरी पुनर्विसर्जिता।

(२) ततः किमित्यागतः?

(३) अप्यद्य सम्बन्धिनीभिः सह संवृत्तमस्य दर्शनं नवेति।

सौध्री। जधा एदे सव्वे त्थविरा परप्परमिलिदा, तधा अह्मेवि वटुकेहिं समं मिलिअ, अणज्झात्रमहूसवं खेलन्ता सम्भावेह्म (१)।

॥ इति परिक्रामतः॥

भाण्डा। तदयं ब्रह्मवादी पुराणराजर्षिर्जनकः प्राचेतस वशिष्ठावुपास्य, सम्प्रत्याश्रमवहिर्वृक्षमूलमधितिष्ठति। य एषः।

हृदि नित्यानुषक्तेन सीताशोकेन तप्यते,
अन्तःप्रसुप्तदहनो ज्वलन्निव वनस्पतिः।

॥ इति निष्क्रान्तौ। विष्कम्भकः॥

॥ ततः प्रविशति जनकः॥

अपत्ये यत्तादृग्दुरितमभवत्तेन महता
विषक्तस्तीव्रेण व्रणितहृदयेन व्यथयता,
पटुर्धारावाही नवइव, चिरेणापि हि न मे
निकृन्तन्मर्म्माणि क्रकचइव मन्युर्विरमति।

कष्टमेवं नाम जरसा, दुःखेन च दुरासदेन, भूयः पराकसान्तपनप्रभृतिभिस्तपोभिरात्तरसधातुरनुपयुज्यमानो, नाद्यापि

---

(१) यथा एते सर्व्वे स्थविराः परस्परं मिलिताः, तथा आवामपि वटुभिः समं मिलित्वा, अनध्यायमहोत्सवं खेलन्तौ संभावयावः।

मे दग्धदेहः पतति। अन्धतामिस्रा ह्यसूर्य्या नाम, ते लोका स्तेभ्यः प्रतिविधीयन्ते, य आत्मघातिन इत्येवमृषयो मन्यन्ते। अनेकसम्वत्सरातिक्रमेऽपि च प्रतिक्षणपरिभावनास्पष्टनिर्भासः प्रत्यग्र इव दारुणो न मे दुःखसंवेगः प्रशाम्यति। अयि मात र्देवयजनसम्भवे देवि सीते, ईदृशस्ते निर्म्माणभागः परिणतो, येन लज्जया स्वच्छन्दमाक्रन्दितुमपि न शक्यते। हा हा पुत्रि; अनियतरुदितस्मितं विराजत्कतिपयकोमलदन्तकुड्मलाग्रं, वदनकमलकं शिशोः स्मरामि, स्खलदसमञ्जसमुग्धजल्पितं ते। भगवति वसुन्धरे, सत्यमतिदृढासि।

त्वं वह्निर्मुनयो वशिष्ठगृहिणी गङ्गा हि यस्याविदु
र्माहात्म्यं, यदि वा रघोः कुलगुरुर्देवः स्वयं भास्करः;
विद्यां वागिव याममूत भवती, तद्वत्तु या दैवतं,
तस्यास्त्वं दुहितुस्तथा विशसनं, किं दारुणे मृष्यथाः।

॥ नेपथ्ये इतइतो भगवतीमहादेव्यौ ॥

जनकः। गृष्टिनोपदिश्यमानमार्गा भगवत्यरुन्धती ॥ उत्थाय ॥ इमा पुनर्म्महादेवीत्याह॥ निरूप्य॥ हा, कथं महा राजदशरथस्य धर्म्मपत्नी, प्रियसखी मे कौशल्या; कएव प्रत्येति, सैवेयमिति।

आसीदियं दशरथस्य गृहे यथा श्रीः,
श्रीरेव वा किमुपमानपदेन सैषा;
कष्टं बतान्यदिव दैववशेन जाता,
दुःखात्मकं किमपि भूतमहो विपाकः।

अयमपरः प्रायो दशाविपर्य्यासः।

यएव मे जनः पूर्व्वमासीन्मूर्त्तो महोत्सवः
चते चारमिवासह्यं,जातं तस्यैव दर्शनं।

॥ ततः प्रविशत्यरुन्धती कौशल्या कञ्चुकी च ॥

अरु। ननु ब्रवीमि द्रष्टव्यः, स्वयमुपेत्य वैदेहइत्येष वः कुलगुरोरादेशः; अतएवाहं प्रेषिता; ततः कोऽयं पदे पदे महानध्यवसायः।

कञ्चु। देवि, संस्तभ्यात्मानं, अनुरुध्यस्व भगवतो वशिष्ठस्यादेशमिति विज्ञापयामि।

कौश। ईदिसे काले मिधिलाधिदेवो दट्ठव्योत्ति, समं ज्जेव सव्वाइं दुःखाइं समुब्भवन्ति,ण सकुणोमि उव्वत्तमाणमूलबन्धणं हिअअं अवत्थावइदुं (१)।

(१) ईदृशे काले मिथिलाधिदेवो द्रष्टव्यइति, सममेव सर्व्वाणि दुःखानि समुद्भवन्ति, न शक्नोमि उद्वर्त्तमानमूलबन्धन हृदयमवस्थापयितुं।

अरु। अत्र कः सन्देहः?

सन्तानवाहीन्यपि मानुषाणां दुःखानि, सद्बन्धुवियोगजानि,

दृष्टे जने प्रेयसि दुःसहानि, स्रोतःसहस्रैरिव संप्लवन्ते।

कौश। कधं वच्छाए वहुए एवं गदे, तस्स राएसिणो मुहं दंसअह्म (१)।

अरु। एष वः श्लाघ्यसम्बन्धी जनकानां कुलोद्वहः,

याज्ञवल्क्यो मुनिर्यस्मै ब्रह्मपारायणं जगौ।

कौश। एसो सो महाराअस्स हिअआणंदो, वच्छाए वहुए पिदा राएसी; हद्धी, हद्धी, सम्भाविदह्मि अणुट्ठिदमहूसवे दिअहे; हा देव्व, सव्वंज्जेव तं णत्थि (२)।

जनकः॥ उपसृत्य॥ भगवत्यरुन्धति, वैदेहः सीरध्वजोऽभिवादयते।

---

(१) कथं वत्साया बध्वा एवं गते, तस्य राजर्षेर्मुखं दर्शयामः।

(२) एष स महाराजस्य हृदयानन्दो, बध्वाः पिता राजर्षिः; हा धिक्, हा धिक्, सम्भावितास्मि अनुष्ठितमहोत्सवे दिवसे, हा देव, सर्व्वमेव तन्नास्ति।

यथा पूतंमन्यो निधिरपि पवित्रस्य महसः
पतिस्ते पूर्व्वेषामपि खलु गुरूणां गुरुतमः,
त्रलाकीमङ्गल्यामवनितललोलेन शिरसा
जगद्वन्द्यां देवीमुषसमिव, वन्दे, भगवतीं।

अरु। परं ज्योतिस्ते प्रकाशतां। अयं त्वां पुनातु देवः परोरजाय एष तपति।

जन। अयि गृष्टे, अपि कुशलमस्याः प्रजापालस्य मातुः।

कञ्चु। निर्व्विशेषमतिनिष्ठुरमुपालब्धाः स्मः, राजर्षे, अनेनैव मन्युना; अचिरपरित्यक्तरामभद्रमुखचन्द्रदर्शनां, नार्हसि त्वं दुःखयितुमतिदुःखितां, देवीं। रामभद्रस्यापि दैवदुर्नियोगः, कोऽपि, यत् किल समन्तात् प्रवृत्तवीभत्सकिम्वदन्तीकाः पौरजानपदा नाग्निपरिशुद्धिमल्पकाः प्रतिपद्यन्ते, इत्यतो दारुणमनुष्ठितं।

जन। आः, कोऽयमग्निर्नामास्मत्प्रसूतिपरिशोधने; कष्टमेवं वादिना जनेन; रामपरिभूता अपि वयं, पुनः परिभूयामहे।

अरु। एवमेतत्, अग्निरिति वत्सां प्रति परिलघून्यचराणि सीतेत्येव पर्य्याप्तं, हा वत्से;

शिशुर्व्वा, शिष्या वा, यदसि, मम, तत्तिष्ठतु, तथा
विशुद्धेरुत्कर्षस्त्वयि तु मम भक्तिं जनयति।

शिशुत्वं, स्त्रैणं वा भवतु, ननु वन्द्यासि जगतः;
गुणाः पूजास्थानं गुणिषु, न च लिङ्गं, न च वयः।

कौश। अम्मो उम्मीलन्ती वेअणाओ (१)।

॥ इति मूर्च्छति ॥

जन। हा कष्टं, किमेतत्!

अरु। राजर्षे किमन्यत्?

स राजा, तत्सौख्यं, स च शिशुजनस्ते च दिवसाः,
स्मृत्वाविर्भूतं त्वयि, सुहृदि, दृष्टे, तदखिलं।
विपाके घोरेऽस्मिन्नथ खलु विमूढा तव सखी;
पुरन्ध्रीणां चेतः कुसुमसुकुमारं हि भवति।

जन। कष्टं, कष्टं, सर्व्वथा नृशंसोऽस्मि, यश्चिरस्य दृष्टान् प्रियसुहृदः प्रियदारान्न स्निग्धं पश्यामि।

स सम्बन्धी, श्लाघ्यः प्रियसुहृदसौ तच्च हृदयं;
स चानन्दः, साक्षादपि च निखिलं जीवितफलं;
शरीरं, जीवो वा, यदधिकमितो वा प्रियतरो,
महाराजः श्रीमान्, किमिव मम नासीद्दशरथः।

कष्टमियमेव सा कौशल्या;

यदस्याः पत्युर्व्वा रहसि परमं दूषितमभू
दभूवं दम्पत्योः पृथगहमुपालम्भविषयः;

---

(१) अम्मो उन्मीलन्ति वेदनाः।

: प्रसादे, कोप वा, तदनु मदधीनो विधिरभू
दलं वान्तः स्मृला दहति यदवस्कन्द्य हृदयं।

अरु। हा कष्टमतिचिरनिरुद्धनिश्वासनिष्ठुरं हृदयमस्याः।

जन। हा प्रियसखि॥ इति कमण्डलूदकेन सिञ्चति॥

कञ्चु।

सुहृदिव प्रकटय्य सुखप्रदः प्रथममेकरसामनुकूलतां,
पुनरकाण्डविवर्त्तनदारुणः प्रविशिनष्टि विधिर्मनसो रुजं।

कौस॥ संज्ञां लब्धा॥ हा वत्से जानइ, कहिं सि; सुमरामि दे विआहलच्छीपरिग्गहेक्कमङ्गलं प्पफुरन्तअनुवद्धहसिद मुद्धमुहपुण्डरीअं; आप्फुरन्तकौमुदीचन्दचन्द्रिआसुन्दरेहिं अङ्गेहिं; उल्लासेहि, जादे, पुणोवि उज्जोएहि उत्सङ्गं, सव्वधा महाराओ भणादि, एसा रङ्गउलमहत्तराणं वङ्क, अह्माणं तु जणअसम्बन्धेण दुहिदिआज्जेव (१)।

---

(१) हे वत्से जानकि, कुत्रासि; स्मरामि ते विवाहलक्ष्मीपरिग्रहैकमङ्गलं प्रस्फुरदनुबद्धहसितमुग्धमुखपुण्डरीकं; आस्फुरत्कौमुदीचन्द्रचन्द्रिकासुन्दरैरङ्गैरुल्लासय, जाते, पुनरप्युद्योतयोत्सङ्गं, सर्व्वथा महाराजो भणति एषा रघुकुलमहत्तराणां वधूरस्माकन्तु जनकसम्बन्धेन दुहितैव।

कञ्चु। यथाह देवी।

पञ्चप्रसूतेरपि राज्ञश्रासीत् प्रियो विशेषेण सुवाङ्गश्चर्तुः,
बधूचतुष्टेऽपि यथैव शान्ता प्रिया तनूजास्य, तथैव सीता।

जन। हा प्रियसख महाराज दशरथ, एवमसि सर्व्वप्रकारकहृदयङ्गमः, कथं विस्मर्य्यसे!

कन्यायाः किल पूजयन्ति पितरो जामातुराप्तं जनं,
सम्बन्धे विपरीतमेव तदभूदाराधनं ते मयि,
त्वं कालेन तथाविधोऽप्यपहृतः, सम्बन्धवीजन्तु तद्
घोरेऽस्मिन्मम जीवलोकनरके पापस्य; धिग्जीवितं!

कौश। जादे जाणइ, किं करेमि; दिढवज्जलेवघणिश्रबन्धणिच्चलंज्जेव हदजीविदं; तधा एत्थ मं मन्दभाइणिं ण परिच्चश्रदि(१)।

श्रर। श्राश्वसिहि, राजपुत्रि, वाष्पविश्रामोऽप्यन्तराले कर्त्तव्यएव अन्यच्च, किं न स्मरसि, यदवोचत् ऋष्यशृङ्गाश्रमे युष्माकं कुलगुरुस्तथेत्युपजातमेवकिन्तु कल्याणोदर्कं भविष्यति।

---

(१) जाते, जानकि, किं करोमि, दृढवज्रलेपघटितं बन्धनिश्चलमेव हतजीवितं; तथाप्यत्र मां मन्दभाग्यां न परित्यजति।

कौश । भअवदि, अदिक्कन्तो मनोरधो (१)।

अरु। तत्किं मन्यस, राजपुत्रि, मृषोद्यं तदिति, नहीदं सुक्षत्रियेऽन्यथा मन्तव्यं, भवितव्यमेव तेन।

आविर्भूतज्योतिषां ब्राह्मणानां ये व्याहारास्तेषु मा संशयोऽभूत्, भद्रा ह्येषां वाचि लक्ष्मीर्नियुक्ता, नैते वाचं विप्लुतां व्याहरन्ति।

॥ नेपथ्ये। कलकलः सर्व्वे आकर्णयन्ति ॥

जनकः। अद्य खलु शिष्टानध्यायइति खेलतां वटूनां कलकलः।

कौश। सुलहसोक्खं दाणिं वालत्तणं भोदि॥ निरूप्य॥ अह्महे, एदाणं मज्झे, को एसो रामभद्दलच्छीसरिसेहिं सावट्ठंभमुद्धललिदेहिं, अङ्गेहिं अह्माणंपि लोअणाइं सीअलावेदि (२)?

अरु॥ अपवार्य्य सहर्षवाष्पं॥ इदं नाम तद्भागीरथीनिवेदितरहस्यं कर्णामृतं; नलेवं विद्मः कतमोऽयमायुष्मतोः कुशलवयोरिति।

---

(१) भगवति, अतिक्रान्तो मनोरथः।

(२) सुलभसौख्यमिदानीं वालत्वं भवति। एतेषां मध्ये, क एष रामभद्रलक्ष्मीसदृशः सावष्टम्भमुग्धललितैरङ्गैरस्माकमपि लोचनानि शीतलयति।

जन। कुवलयदलश्यामस्निग्धः शिखण्डकमण्डनो,
वटुपरिषदं पुण्यश्रीकः, श्रियैव सभाजयन्;
पुनरिव शिशुर्भूत्वा वत्सः, स मे रघुनन्दनो
झटिति कुरुते दृष्टः, कोऽयं दृशोरमृताञ्जनं?

कञ्च। नूनं क्षत्रियब्रह्मचारी दारकोऽयमिति मन्ये।
एवमेव। तथाहि।

चूडाचुम्बितकङ्कपत्रमभितस्तूणीद्वयं पृष्ठतो,
भस्मस्तोकपवित्रलाञ्छनमरो धत्ते त्वचं रौरवीं,
मौर्व्या मेखलया नियन्त्रितमधो वासश्च माञ्जिष्ठिकं,
पाणौ कार्मुकमक्षसूत्रवलयं, दण्डोऽपरः पैप्पलः।

भगवत्यरुन्धति, किमुत्प्रेक्षसे, कुतस्त्योऽयमिति?

अरु। अद्यैव वयमप्यागताः।

जन। आर्य्य गृष्टे, अतीव मे कौतुकं वर्त्तते। तद्भगवन्तं वाल्मीकिमेव गत्वा, पृच्छ; इमञ्च वालकं ब्रूहि, केऽप्येते प्रवयसस्त्वां दिदृक्षवइति।

कञ्चु। यदाज्ञापयसीति ॥ निष्क्रान्तः॥

कौश। किं भणथ; एवं भणिदो आगमिस्सदीत्ति (१)?

---

(१) किं भणत; एवं भणित आगमिष्यतीति?

अरु। भिद्येत वा सद्वृत्तमीदृशस्य निर्म्माणस्य।

कौश॥ विचिन्त्य॥ कधं सविणग्रं णिसामिदरिसिवश्रणो, विस ज्जिदइसिदारश्रो, एतोहिमुहं पसरिदो ज्जेव सो वच्छो (१)।

जन॥ चिरं निर्व्वर्ण्य ॥ भो: किमप्येतत्।

महिम्नामेतस्मिन् विनयशिशुतामौग्ध्यमसृणो
विदग्धैर्निर्ग्राह्यो, न पुनरविदग्धैरतिशय:;
मनो मे संमोहः स्थिरमपि हरत्येव बलवा
नयोधातुं यद्वत् परिलघुरयस्कान्तशकल:।

॥ प्रविश्य ॥ लव: ॥ स्वगतं॥ अज्ञातनामक्रमाभिजनान् पूज्या नपि न: स्वत: कथमभिवादयिष्ये ॥ विचिन्त्य॥ अयं पुनरविरुद्ध: प्रकारइति वृद्धेभ्य: श्रूयते॥ सविनयमुपसृत्य॥ एष वो लवस्य शिरसा प्रणामपर्य्याय:।

अरुन्धतीजनकौ। कल्याणिन्नायुष्मान् भूया:।

कौश। ताद, चिरं मे जीव (२)।

अरु। एहि वत्स॥ लवं उत्सङ्गे कृत्वा, अपवार्य्य॥ दिष्ट्या न केवलमुत्सङ्गश्चिरान्मनोरथो मे सम्पूर्ण:।

---

(१) कथं सविनयं निशामितऋष्टिवचनो विसर्जितऋषि दारक, इताऽभिमुखं प्रसृतएव स वत्स:।

(२) तात, चिरं मे जीव।

कौश। जाद इदोवि दाव एहि ॥ उत्सङ्गे कृत्वा ॥ अच्चहे, ण केवलं दरविकसन्तनीलुप्पलसामलुज्जदेण देहबन्धेण कवलिदारविन्दकेसरकसाअकण्ठकलहंसणिग्घोसघग्घरणिणाददीहरदीहरेण सरेण रामभद्दमणुहरदि ; णं कठिणकमलगब्भपह्मलो सरीरफंसोवि तादिसोज्जेव वत्सस्स। जाद, पेक्खामि दाव दे मुहं॥ चिवुकमुन्नमय्य निरूप्य च सवाष्पाकूतं॥ राएसि, किं ण पेक्खसि, णिउणं णिरूविज्जन्ते, वच्छाए वहूए मुहचंदेण संवददिज्जेव(१)।

जन। पश्यामि, सखि, पश्यामि।

कौश। अम्मो उम्मत्तीभूदंविअ मे हिअअं किंपि एतो मुहं विप्पलवदि (२)।

---

(१) जात इतोऽपि तावदेहि। विस्मये, न केवलं दरविकसन्नीलोत्पलश्यामलोन्नतेन देहबन्धेन कवलितारविन्दकेसरकषायकण्ठकलहंसनिर्घोषघर्घरनिनाददीर्घदीर्घेण स्वरेण, रामभद्रमनुहरति, ननु कठिनकमलगर्भपक्ष्मलः शरीरस्पर्शोऽपि तादृश एव वत्सस्य। जात प्रेक्षे तावत्ते मुखं। राजर्षे, किं न प्रेक्षसे निपुणं निरूप्यमाणो वत्सायावध्वा मुखचन्द्रेण संवदत्येव।

(२) अम्मो उन्मत्तीभूतमिव मे हृदयं किञ्चिदपि इतो मखं विप्रलपति।

जन ॥ निरूप्य ॥

वत्सायाश्च रघूद्वहस्य च शिशावस्मिन्नभिव्यज्यते,
संपूर्णप्रतिविम्बितेव निखिला सैवाकृतिः, सा द्युतिः ;
सा वाणी, विनयः स एव, सहजः पुण्यानुभावोऽप्यसौ ;
हा, हा, दैव, किमुत्पथैर्मम मनः पारिप्लवं धावति।

कौश। अत्थि दे मादा, सुमरसि वा तादं ?(१)

लवः। नहि, नहि।

कौश। तदो कस्स तुमं (२)।

लवः। भगवतो वाल्मीकेः।

कौश। अयि, जाद, कधिदव्वं कधेहि (३)।

लवः। एतदेव जानामि।

॥ नेपथ्ये॥ भोभोः सैनिकाः, एष खलु कुमारश्चन्द्रकेतुराज्ञापयति ; न केनचिदाश्रमाभ्यर्णभूमिराक्रमितव्येति।

अरुन्धतीजनकौ। अद्य, मेध्याश्वरक्षाप्रसङ्गादुपागतो वत्सश्चन्द्रकेतुरद्य द्रष्टव्य ; इत्यहो सुदिवसः,

कौश। वच्छ लक्खणस्स पुत्तको आणवेदित्ति, अमिअविन्दुसुन्दराइं अक्खराइं सुणीअन्ति (४)।

---

(१) अस्ति ते माता, स्मरसि वा तातं?

(२) ततः कस्य त्वं?

(३) जात, कथयितव्यं कथय।

(४) वत्सलक्ष्मणस्य पुत्र आज्ञापयतीति, अमृतविन्दुसुन्दराण्यक्षराणि श्रूयन्ते।

लवः। आर्य्य क एष चन्द्रकेतुर्नाम?

जन। जानासि रामलक्ष्मणौ दाशरथी?

लवः। एतावेव रामायणकथापुरुषौ।

जन। अथ किं।

लवः। तं, कथं न जानामि?

जन। तस्य लक्ष्मणस्यायमात्मजश्चन्द्रकेतुः।

लवः। उर्मिलापुत्रस्तर्हि मैथिलस्य राजर्षेर्दौहित्रः।

अरु॥ विहस्य॥ आविष्कृतं कथाप्रावीण्यं वत्सेन।

जन॥ विचिन्त्य॥ यदि त्वमीदृशः कथायामभिज्ञस्तद्ब्रूहि तावत्पृच्छामस्तेषां दशरथात्मजानां किंनामधेयान्यपत्यानि, केषु दारेषु प्रसूतानि?

लवः। नायं कथाप्रविभागोऽस्माभिरन्येन वा श्रुतपूर्व्वः

जन। किं न प्रणीत एवं कविना।

लवः। प्रणीतो, न तु प्रकाशितः; तस्यैव खलु कोऽप्येकदेशः सन्दर्भान्तरेण रसवानभिनेयार्थः कृतस्तञ्च स्वहस्तलिखितं, मुनिर्भगवान् व्यसृजद्भरतस्य मुनेस्तौर्य्यत्रिकसूत्रकारस्य।

जन। किमर्थं?

लवः। स किल भगवान् भरतस्तमप्सरोभिः प्रयोजयिष्यतीति।

जन। तत्सर्व्वमस्माकमिदमाकूतकरं।

लवः। महती पुनस्तस्मिन् भगवतो वाल्मीकेरास्था;

तदमीषामन्तेवासिनां हस्तेन तत्पुस्तकं भरताश्रमं प्रेषितं। तेषा मानुयात्रिकश्चापपाणिरप्रमादार्थमस्मज्ज्याता प्रेषितः।

कौश। जाद, भादावि दे अत्थि (१)?

लवः। अस्त्यार्य्यः कुशोनाम।

कौश। ज्येट्ठोत्ति भणिदं भोदि (२)?

लवः। एवमेतत् प्रसवक्रमेण स किल ज्यायानिति।

जन। किं यमजावायुष्मन्तौ?

लवः। अथकिं।

जनः। कथय, कथाप्रबन्धस्य कीदृशः पर्य्यन्तः।

लवः। अलीकपौरप्रवादोद्विग्नेन राज्ञा निर्वासितां, देवय जनसम्भवां सीतादेवीमासन्नप्रसववेदनामेकाकिनीमरण्ये परित्यज्य, लक्ष्मणः प्रतिनिवृत्तइति।

कौश। हा वच्छे, मुद्धचन्दमुहि, को दाणिं दे कुसुमभूदस्स सरीरस्स देव्वदुव्विलासपरिणामो एकल्लिआए णिवडिदो (३)।

जन। हा वत्से!

नूनं त्वया परिभवश्च नवश्च घोरं;

ताञ्च व्यथां प्रसवकालकृतामवाप्य,

---

(१) जात भ्रातापि ते अस्ति?

(२) ज्येष्ठ इति भणितं भवति?

(३) हा वत्से, मुग्धचन्द्रमुखि, कइदानीं ते कुसुमभूतस्य शरीरस्य दैवदुर्विलासपरिणामएकाकिन्यानिपतितः।

क्रव्याद्गणेषु परितः परिवारयत्सु,

मन्त्रस्तया शरणमित्यसकृत् स्मृतोऽस्मि।

लवः। आर्य्ये कावेतौ?

अरु। इयं कौशल्या, अयं जनकः।

लवः ॥ सवहुमानखेदकौतुकं पश्यति ॥

जन। अहो दुर्म्मर्य्यादता दुरात्मनां पौराणां! अहो रामस्य राज्ञः चिप्रकारिता!

एतद्वैशसघोरवज्रपतनं शश्वन्ममोत्पश्यतः,

क्रोधस्य ज्वलितुं धगित्यवसरश्चापेन, शापेन वा।

कौश। भअवदि, परित्ताहि, परित्ताहि; प्पसादेहि रुहिअं राएसिं (१)।

अरु। एतद्धि परिभूतानां प्रायश्चित्तं मनस्विनां,

राजन्नपत्यं रामस्ते पाल्याश्च कृपणाः प्रजाः।

जन। शान्तं वा रघुनन्दने, तदुभयं तत्पुत्रभाण्ड हि मे,

भूयिष्ठद्विजबालवृद्धविकलस्त्रैणश्च पौरो जनः।

॥ प्रविश्य संभ्रान्ता वटवः ॥ कुमार, अश्वोऽश्व इति; पशुसमाम्नायिकः कोऽपि भूतविशेषो जनपदेषु श्रूयते, सोऽयमस्माभिरधुना स्वयं प्रत्यक्षीकृतः।

लवः। अश्वोऽश्वइति, तत्र पशुसमाम्नाये, सांग्रामिके च, पठ्यते; तद्ब्रूत कीदृशः?

---

(१) भगवति, परित्रायस्व, परित्रायस्व; प्रसादय राजर्षिं।

वटवः। श्रूयतां;

पश्चात्पुच्छं वहति विपुलं, तच्च धूनोत्यजस्रं,

दीर्घग्रीवः स भवति खुरास्तस्य चत्वारएव।

शष्पाण्यत्ति, प्रकिरति, शकृत्पिण्डकानाम्रमात्रान्,

किं वाख्यातैर्व्रजति स पुनर्दूरमेह्येहि, यामः।

॥ इत्युपसृत्याजिने हस्तयोश्चाकर्षन्ति ॥

लवः॥ सकौतुकोपरोधविनयं ॥ आर्य्याः, पश्यत पश्यत, एभिर्नीतोऽस्मीति॥ त्वरितं परिक्रामति ॥

अरुन्धतीजनकौ। पूरयतु कुतूहलं वत्सः।

कौश। भअवदि, जाणामि, एदं अणालोअन्ती ण जीआमि, विअ;अतो अण्णदो भविअ, पेक्खह्म दाव गच्छन्तं दीहाउं (१)।

अरु। अतिजवेन दूरमतिक्रान्तः स चपलः कथं दृश्यते?

॥ प्रविश्य ॥ कञ्चुकी। भगवान् वाल्मीकिराह, ज्ञातव्यमेतदवसरे भवद्भिरिति।

जन। अतिगम्भीरमेतत् किमपि भविष्यति। भगवत्यरुन्धति, सखि कौशल्ये, आर्य्ये गृष्टे, स्वयमेव गत्वा, भगवन्तं प्राचेतसं पश्याम इति॥ निष्क्रान्तो वृद्धवर्गः॥

वटवः। पश्यतु हि कुमारस्तदाश्चर्यं।

---

(१) भगवति, जानामि, एतमपश्यन्ती न जीवामीव; तदितोऽन्यतो भूत्वा, प्रेचामहे, तावद्गच्छन्तं दीर्घायुषं।

लवः। दृष्टमवगतञ्च, नूनमाश्वमेधिकोऽयमश्वइति।

वटवः। कथं ज्ञायते?

लवः। ननु मूर्खाः, पठितमेव युष्माभिस्तत्काण्डे, किं न पश्यत? प्रत्येकं शतसंख्याः कवचिनो, दण्डिनो, निषङ्गिणश्च, रक्षितारस्तत्प्रायमेवेदमपि दृश्यते। यदीह न प्रत्ययस्तद्गत्वा पृच्छत।

वटवः। भो भोः, किं प्रयोजनोऽयमश्वः परिवृतःपर्य्यटति?

लवः॥ सस्पृहमात्मगतं॥ अये, अश्वमेधइति विश्वविजयिनां क्षत्रियाणामूर्जस्वलः सर्व्वक्षत्रियपरिभावी महानुत्कर्षनिष्कर्षः।

॥ नेपथ्ये॥ अयमश्वः, पताकेयमथवा, वीरघोषणा,

सप्तलोकैकवीरस्य दशकण्ठकुलद्विषः।

लवः ॥ सव्यथमिव॥ अहो, सन्दीपनान्यक्षराणि।

वटवः। प्राज्ञः खलु कुमारः, किमुच्यते?

लवः। भो भोस्तत्किमक्षत्रिया पृथ्वी, यदेवमुद्घुष्यते?

॥ [नेप]थ्ये॥ अरे, महाराजम्प्रति कुतः क्षत्रियाः?

लवः। धिग्जाल्मान्।

यदि ते सन्ति सन्त्येव, केयमन्या विभीषिका,

किमुक्तैः, शरसम्बाधां पताकां तां हरामि वः।

भो भो वटवः, परिवृत्य लोष्ठैरपघ्नन्तो, नयतैनमश्वं, एष

रोहितानां मध्ये वराकस्तरतु।

॥ प्रविश्य सक्रोधदर्पः पुरुषः॥ धिक् चापलं; किमुक्तवा नसि? तीक्ष्णनीरसा ह्यायुधीयश्रेणयः शिशोरपि न दृप्तां वाच मनुसहन्ते; राजपुत्रश्चन्द्रकेतुराकृष्टशरासनः, सौम्यपूर्व्वारण्य दर्शनकौतूहलाचिप्तहृदयो, न परापतत्यद्यापि, तत्त्वरितमप सर्पतानेनं तरुगहनेन।

वटवः। कुमार, कृतमनेनाश्वेन; तर्ज्जयन्ति विस्फुरित शस्त्राः कुमारमायुधीयश्रेणयः; दूरे चाश्रमपदमितस्तदेहि हरिणप्लुतैः पलायामहे।

लवः। किं नाम विस्फुरन्ति शस्त्राणि॥ धनुरारोपयन्॥

ज्याजिह्वया वलयितोत्कटकोटिदंष्ट्र
मुद्गारिघोरघनघर्घरघोषमेतत्,
ग्रासप्रसक्तहसदन्तकवक्त्रयन्त्र
जृम्भाविडम्बिविकटोदरमस्तु चापं।

॥ इति यथोचितं परिक्रम्य निष्क्रान्ताः सर्व्वे॥ कौशल्याजन कोनाम चतुर्थोऽङ्कः॥

॥ अथ पञ्चमोऽङ्कः ॥

॥ नेपथ्ये ॥ भो भोः सैनिकाः, जातं जातमवलम्बनमस्माकं। नन्वेष त्वरितसुमन्त्रनुद्यमानव्यावल्गत्प्रजवनवाजिना रथेन, उद्धातप्रचलितकोविदारकेतुः श्रुत्वा वः प्रधनमुपैति चन्द्रकेतुः।

॥ ततः प्रविशति, सुमन्त्रसारथिना रथेन, धनुःपाणिः, स्युद्भुतहर्षसंभ्रमश्चन्द्रकेतुः ॥ आर्य्य सुमन्त्र पश्य!

किरति कलितकिञ्चित्कोपरज्यन्मुखश्री
रविरतगुणगुञ्जत्कोटिना कार्मुकेण,
समरशिरसि चञ्चचन्द्रचूडश्चमूना
मुपरि शरतुषारं कोऽप्ययं वीरपातः?

आश्चर्य्यमाश्चर्य्यं!

मुनिजनशिशुरेकः, सर्व्वतः सैन्यकाये,
नवइव रघुवंशस्याप्रसिद्धः, प्ररोहः;
दलितकरिकपोलग्रन्थिटङ्कारघोरं,
ज्वलितशरसहस्रैः, कौतुकं मे करोति।

सुमन्त्रः। आयुष्मन्।

अतिशयितसुरासुरप्रभावं शिशुमवलोक्य, तवैव तुल्यरूपं, कुशिकसुतमखद्विषां प्रमाथे धृतधनुषं रघुनन्दनं स्मरामि।

चन्द्र। इममन्विकमुद्दिश्य, भूयसामारम्भ इति, हृदयमपत्रपते।

अयं हि शिशुरेकैकः समररेणुभूरिस्फुर
त्करालकरकन्दलीकलितशस्त्रजालैर्बलैः ;
क्वणत्कनककिङ्किणीझणझणायितस्यन्दनै
रमन्दमददुर्दिनद्विरदवारिदैरावृतः।

सुमं। वत्स, एभिः समस्तैरपि किमस्य किं पुनर्व्यस्तैः?

चन्द्र। आर्य्य, लर्य्यतामनेन हि महानाश्रितजनप्रमाथो ऽस्माकमारब्धः। तथाहि ;

आगुञ्जद्गिरिकुञ्जकुञ्जरघटाविस्तीर्णकर्णज्वरं,
ज्यानिर्घोषममन्ददुन्दुभिरवैराध्मातमुज्जृम्भयन्,
वेल्लद्भैरवभूरिरुण्डनिकरैर्वीरो विधत्ते, भुव
स्तृप्यत्कालकरालवक्त्रविघसव्याकीर्य्यमाणा इव।

सुमं॥ स्वगतं॥ कथमीदृशेन सह वत्सचन्द्रकेतोर्द्वन्द्वसंप्रहारमनुजानीयां? ॥ विचिन्त्य ॥ अथवा, इक्ष्वाकुगृहवृद्धाः खलु वयं ; प्रत्युपस्थिते च का गतिः?

चन्द्र ॥ सविस्मयलज्जासंभ्रमं ॥ धिक् प्रतिनिवृत्तानि सर्व्वतः सैन्यानि मम।

सुमं ॥ रथवेगमभिनीय ॥ आयुष्मन्, स एष वाग्विषयीकृतस्ते प्रवीरः।

चन्द्र ॥ विस्मृतिमभिनीय॥ आर्य्य, किन्नामधेयमाख्यातमाङ्कायकैः।

सुमं। वत्स, लव इति।

चन्द्र। भोभो लव, महाबाहो किमेभिस्तव, सैनिकैः,

एषोऽहमेहि मामेव, तेजस्तेजसि शाम्यतु।

सुमं। कुमार, पश्य पश्य।

व्यपवर्त्तत एष बालवीरः पृतनानिर्म्मथनात्त्वयोपहूतः,

स्तनयित्नुरवादिभावलीनामवमर्दादिव दृप्तसिंहशावः।

॥ ततः प्रविशति त्वरितोद्धतपराक्रमो लवः॥

लवः। साधु राजपुत्र, साधु; सत्यमैच्वाकः खल्वसि, तदयं परागतएवास्मि।

॥ नेपथ्ये॥ महान् कलकलः।

लवः॥ सावेगं परावृत्य॥ कथमिदानीं भग्नाअपि प्रतिनिवृत्य युद्धाभिसारिणः पर्य्यवष्टभ्य निघ्नन्ति, मामूपतयः? धिग्जाल्मान्।

अयं शैलाघातक्षुभितवडवावक्त्रहुतभुक्,

प्रचण्डक्रोधार्च्चिर्निचयकवलत्वं व्रजतु मे;

समन्तादुत्सर्पन् घनतुमुलहेलाकलकलः,

पयोराशेरोघः प्रलयपवनास्फालितइव।

॥ सखेदं परिक्रामति॥

चन्द्र। भोभोः कुमार,

अत्यद्भुतादपि गुणातिशयात् प्रियोऽसि,

तस्मात् सखा त्वमसि यन्मम तत्तवैव;

तत्किं निजे परिजने कदनं करोषि?
नन्वेष दर्पनिकषस्तव चन्द्रकेतुः।

लवः ॥ सहर्षसंभ्रमं परावृत्य ॥ अहो, महानुभावस्य प्रसन्नस्वरकर्कशा वीरवचनयुक्तिर्वैकर्त्तनकुलकुमारस्य! तत्किमेभिरेनमेव तावत् सम्भावयामि ॥ पुनर्नेपथ्ये कलकलः ॥

लवः ॥ सक्रोधनिर्वेदं ॥ आः, कदर्थितोऽहमेभिर्वारंवारं विघ्नकारिभिर्घोषैः ॥ तदभिमुखं परिक्रामति ॥

चन्द्र। आर्य्य, आर्य्य, दृश्यतामेतद्द्रष्टव्यं।

दर्पेण कौतुकवतामपि बद्धलक्ष्यः
पश्चाद्बलैरनुसृतोऽयमुदीर्णधन्वा
द्वेधा समुद्धतमरुत्तरलस्य, धत्ते,
मेघस्य माघवतचापधरस्य लक्ष्मीं।

सुमं। कुमार एवैनं द्रष्टुमपि जानाति, केवलन्तु परवन्तो वयं विस्मयेन।

चन्द्र। भोभो राजानः,

सङ्ख्यातीतैर्द्विरदतुरगस्यन्दनस्थैः पदाता
वत्रैकस्मिन्, कवचनिचितैर्मध्यचर्म्मोत्तरीये,
कालज्येष्ठैरचरमवयः कार्म्मुकाये, भवद्भि
र्योऽयं बद्धो युधि परिकरस्तेन वो धिग्धिगस्मान्।

लवः ॥ सोन्माथं ॥ कथमनुकम्पते नाम? ॥ विचिन्त्य ॥ भवतु,

कालहरणप्रतिषेधाय जृम्भकास्त्रेण तावत् सैन्यानि संस्तम्भयामि ॥ इति ध्यानं नाटयति ॥

सुमं। तत्किमकस्मादस्माकं बले सैन्यघोषाः प्रशाम्यन्तु।

लवः। पश्याम्येनमधुना सप्रगल्भं।

सुमं॥ ससम्भ्रमं॥ वत्स, मन्ये कुमारकेणानेन जृम्भकास्त्रमामन्त्रितं।

चन्द्र। अत्र कः सन्देहः?

व्यतिकरइव भीमस्तामसो वैद्युतस्च,
प्रणिहितमपि चक्षुर्ग्रस्तमुक्तं हिनस्ति।
अथ लिखितमिवैतत् सैन्यमस्पन्दमास्ते
नियतममितवीर्य्यं जृम्भते जृम्भकास्त्रं।

आश्चर्य्यं आश्चर्य्यं!

पातालोदरकुञ्जपुञ्जिततमःश्यामैर्नभो जृम्भकै
रुत्तप्तस्फुरदारकूटकपिलज्योतिर्ज्वलद्दीप्तिभिः;
कल्पाक्षेपकठोरभैरवमरुद्व्यस्तैरवाकीर्य्यते,
मीलन्मेघतडित्कडारकुहरैर्विन्ध्याद्रिकूटैरिव।

सुमं। कुतः पुनरस्य जृम्भकाणामागमः स्यात्?

चन्द्र। भगवतः प्राचेतसादिति मन्यामहे।

सुमं। नैष व्यवहारोऽस्त्रेषु, विशेषतो जृम्भकेषु।
यतः।

कृशाश्वतनया ह्येते कृशाश्वात्कौशिकङ्गताः;
अथ तत्संप्रदायेन रामभद्रे स्थिता इति।

चन्द्र।॰अपरेऽपि परमोपचीयमानसत्वप्रकाशाः स्वयं हि मन्त्र द्दशः पश्यन्ति।

सुमं॥ सास्रं॥ वत्स, सावधानो भव, परागतः प्रवीरः।

॥ कुमारावन्योन्यं प्रति॥ अहो प्रियदर्शनः कुमारः॥ सस्नेहानुरागं निर्व्वर्ण्य॥

यदृच्छासंवादः किमु, किमु गुणानामतिशयः,
पुराणो वा जन्मान्तरनिविडबन्धः, परिचयः,
निजो वा सम्बन्धः, किमु विधिवशात् कोऽप्यविदितो,
ममैतस्मिन् दृष्टे हृदयमवधानं रचयति।

सुमं। भूयसा जीविधर्म्मएष, यद्रसमयी कस्यचित् क्वचित् प्रीतिः, यत्र लौकिकानामुपचारस्तारामैत्रकं वा चक्षूराग इति, तमप्रतिसंख्येयमनिबन्धनं प्रेमाणमामनन्ति।

अहेतुः पक्षपातो यस्तस्य नास्ति प्रतिक्रिया,
स हि स्नेहात्मकस्तन्तुरन्तर्म्मर्म्माणि सीव्यति।

॥ कुमारावन्योन्यं प्रति॥

एतस्मिन् मसृणितराजपट्टकान्ते
मोक्तव्याः कथमिव सायकाः शरीरे?
यत्प्राप्तौ मम परिरम्भणाभिलाषा
दुन्मीलत्पुलककदम्बमङ्गमास्ते।

किन्त्वाक्रान्तकठोरतेजसि गतिः का नाम शस्त्रं विना?
शस्त्रेणापि हि तेन किन्न विषयो जायेत यस्येदृशः।

किं वक्ष्यत्ययमेवमद्य विमुखं मामुद्यतेऽप्यायुधे,
वीराणां समयो हि दारुणरसः स्नेहक्रमं वाधते।

सुमं॥ लवं निर्वर्ण्य सास्रमात्मगतं ॥ हृदय, किमन्यथा परिकल्पसे ?

मनोरथस्य यद्वीजं तद्दैवेनादितो हृतं,
लतायां पूर्व्वलूनायां प्रसूनस्यागमः कुतः ॰

चन्द्र। अवतराम्यहमार्य्य सुमन्त्र स्यन्दनात्।

सुमं। तत्कस्य हेतोः?

चन्द्र। यतस्तावदयं वीरः पुरुषः पूजितो भवति ॥ अपिच ॥ खल्वार्य्य चात्रधर्म्मः समनुगतो भवति, न रथिनः पादचार मायोधयन्तीति शस्त्रदेवताः परिभाषन्ते।

सुमं। कष्टं वतानुप्रपन्नोऽस्मि।

कथं न्याय्यमनुष्टानं मादृशः प्रतिषेधतु;
क ं वाप्यनुजानातु साहसैकरसां क्रियां।

चन्द्र। यदा तातमिश्रा अपि पितुः प्रियं सखायं धर्म्मार्थसंशयेष्वार्य्यमेव पृच्छन्ति, तत्किमार्य्यो विमृशति ?

सुमं। आयुष्मन्नेवं यथाधर्म्ममभिमन्यसे।

एष सांग्रामिको न्याय, एष धर्म्मः सनातनः,
इयंहि रघुसिंहानां वीरचारित्रपद्धतिः।

चन्द्र। प्रतिरूपं वचनमार्य्यस्य।

इतिहासपुराणञ्च धर्म्मप्रवचनान्यपि,
भवन्त एव जानन्ति, रघूणाञ्च कुलस्थितिं।

सुमं॥ सस्नेहास्नं परिष्वज्य॥

जातस्य ते पितुरपीन्द्रजितो निहन्तु
र्वत्सस्य वत्स कति नाम दिनान्यमूनि;
तस्याप्यपत्यमनुगच्छति वीरवृत्तं,
दिष्ट्या गतं दशरथस्य कुलप्रतिष्ठां।

चन्द्र॥ सकष्टं॥

अप्रतिष्ठे रघुज्येष्ठे, का प्रतिष्ठा कुलस्य नः,
इति दुःखेन तप्यन्ते त्रयो नः पितरोऽपरे।

सुमं। अहह, हृदयमर्म्मदारुणान्येतानि चन्द्रकेतोर्वचनानि।

लवः। हन्त मिश्रीकृतो रसक्रमो वर्त्तते।

यथेन्द्रावानन्दं व्रजति समुपोढे कुमुदिनी,
तथैवास्मिन् दृष्टिर्म्मम कलहकामः पुनरयं;
झणत्कारक्रूरक्वणितगुणगुञ्जद्गुरुधनु
र्धृतप्रेमा बाहुर्विकचविकरालोल्वणरसः।

चन्द्र॥ अवतरणं रूपयन्॥ आर्य्य, साविचश्चन्द्रकेतुरभिवादयते।

सुम। अजितं पुण्यमूर्जस्वि ककुत्स्थस्येव ते महः,
श्रेयसे शाश्वतो देवो वराहः परिकल्पतां।

॥ अपिच ॥

देवस्त्वां सविता धिनोतु समरे गोत्रस्य यस्ते पिता;
त्वां मैत्रावरुणोऽभिनन्दतु गुरुर्यस्ते गुरूणामपि;
ऐन्द्रं वैष्णवमाग्नि मारुतमथो सौपर्णमोजोऽस्तु ते;
देयादेव च रामलक्ष्मणधनुर्ज्याघोषमन्त्रो जयं।

लवः। कुमार, अति हि नाम शोभसे रथस्थएव, कृतं कृतमत्यादरेण।

चन्द्र। तर्हि महाभागोऽप्यन्यं रथमलङ्करोतु।

लवः। आर्य्य, प्रत्यारोपय रथोपरि राजपुत्रं।

सुमं। त्वमप्यनुरुध्यस्व वत्सचन्द्रकेतोर्वचनं।

लवः। को विचारः स्वेषूपकरणेषु, किन्त्वरण्यसदो वयमनभ्यस्तरथचर्य्याः।

सुमं। जानासि, वत्स, दर्पसौजन्ययोर्यथाचरित्रं। यदि पुनरीदृशं त्वामैक्ष्वाको रामभद्रः पश्येत्तदास्य स्नेहेन हृदयमभिस्यन्देत्।

लवः। मन्ये, सुजनः स राजर्षिः श्रूयते॥ सलज्जमिव॥

वयमपि न खल्वेवंप्रायाः क्रतुष्वपि मत्सराः,
कद्रुह च गुणैस्तं राजानं न वा वह्न मन्यते।
तदपि खलु मे स व्याहारस्तुरङ्गमरक्षिणां
विकृतिमखिलक्षत्राक्षेपप्रचण्डतयाऽकरोत्।

चन्द्र ॥ सस्मितं ॥ किञ्च भवतस्तातप्रतापोत्कर्षेऽप्यमर्षः।

लवः। अस्त्वमर्षो, मा भूद्वा, एतत्त पृच्छामि; दान्तं हि राघवं राजानं शृणुमः, स किल नात्मना दृप्यति, नास्य प्रजा ईदृश्यो जायन्ते, तत्किं मनुष्यास्तस्य राक्षसीं वाचं वदन्ति।

ऋषयो राक्षसीमाहुर्वाचमुन्मत्तदृप्तयोः,
सा योनिः सर्व्ववैराणां, सा हि लोकस्य निर्ऋतिः।

इतिह स्म तां निन्दन्ति अथेतरामभिष्टुवन्ति।

कामान् दुग्धे, विप्रकर्षत्यलक्ष्मीं, कीर्त्तिं सूते, दुष्कृतं या हिनस्ति,
तां चाप्येतां मातरं मङ्गलानां धेनुं धीराः सूनृतां वाचमाहुः।

सुमं। परिपूतस्वभावोऽयं कुमारः प्राचेतसान्तेवासी वदत्यभिसंपन्नमार्षेण संस्कारेण।

लवः। यत्पुनश्चन्द्रकेतो वदसि, किञ्च भवतस्तातप्रतापोत्कर्षेऽप्यमर्ष इति, तत्पृच्छामि; किं व्यवस्थितविषयाः क्षत्रधर्म्मा इति।

सुमं। नैव खलु जानासि तं देवमैक्ष्वाकं, यदेवं वदसि, तद्विरम्यतामतिप्रसङ्गात्।

सैनिकानां प्रमाथेन सत्यमोजायितं त्वया,
जामदग्न्यस्य दमने नैवं निर्व्वक्तुमर्हसि।

लवः ॥ सहासं ॥ आर्य्य, जामदग्न्यस्यापि दमनः स राजा इति; काऽयमुच्चैर्व्वादः।

सिद्धं ह्येतद्वाचि वीर्य्यं द्विजानां, बाह्वोर्वीर्य्यं यत्तु तत्क्षत्त्रियाणां,
शस्त्रग्राही ब्राह्मणो जामदग्न्यस्तस्मिन्दान्ते का स्तुतिस्तस्य राज्ञः।

चन्द्र। सोन्माथमिव ॥ आर्य्य, आर्य्य, कृतमुत्तरोत्तरेण।

कोऽप्येष संप्रति नवः पुरुषावतारो,
वीरो न यस्य भगवान् भृगुनन्दनोऽपि?
पर्य्याप्तसप्तभुवनाभयदक्षिणानि
पुण्यानि तातचरितानि च यो न वेद?

लवः। को हि रघुपतेश्चरितं महिमानञ्च न जानाति। यदि नाम किञ्चिद्वक्तव्यमस्ति। अथवा, शान्तं,

वृद्धास्ते न विचारणीयचरितास्तिष्ठन्तु हुं वर्त्तते,
सुन्दस्त्रीदमने,ऽप्यखण्डयशसो लोके महान्तो हि ते,
यानि त्रीण्यकुतोभयान्यपि पदान्यासन् खरायोधने,
यद्वा कौशलमिन्द्रसूनुनिधने, तत्राप्यभिज्ञो जनः।

चन्द्र। आस्तातापवादभिन्नमर्य्यादाति नाम प्रगल्भसे।

लवः। अये, मय्येव भ्रुकुटीधरः संवृत्तः?

सुमं। स्फुरितमनयोः क्रोधेन। तथाहि।

चूडामण्डलबन्धनं तरलयत्याकूतजो वेपथुः,
किञ्चित्कोकनदच्छदस्य सदृशे नेत्रे स्वयं रज्यतः;
धत्ते कान्तिमकाण्डताण्डवितयोर्भङ्गेन वक्त्रं भ्रुवो
श्चन्द्रस्योत्कटलाञ्छनस्य कमलस्योद्भ्रान्तभृङ्गस्य च।

कुमारा। तदितो विमर्दक्षमां भूमिमवतरावः।

॥ इति निष्क्रान्ताः सर्व्वे॥

॥ कुमारविक्रमो नाम पञ्चमोऽङ्कः॥

॥ अथ षष्ठोऽङ्कः ॥

॥ ततः प्रविशति विमानोज्ज्वलं विद्याधरमिथुनं ॥

विद्याधरः। अहो नु खलुभोरनयोर्विकर्त्तनकुलकुमारयोरकाण्डकलहकरणप्रचण्डयोरुद्योतितचात्रलक्ष्मीकाण्डुतोद्भ्रान्तदेवासुराणि विक्रान्तचरितानि। तथाहि प्रिये, पश्य, पश्य।

झणज्झणितिकङ्कणक्वणितकिङ्किणीकं धनु
र्ध्वनद्गुरुगणाटनीकृतकरालकोलाहलं;
वितत्य किरतोः शरानविरतस्फुरच्चूडयो
र्विचित्रमभिवर्द्धते भुवनभीममायोधनं।
विजृम्भितञ्च दिव्यास्त्रं मङ्गलाय द्वयोरपि,
स्तनयित्नोरिवामन्द्रं दुन्दुभेर्दुन्दुमायितं।

तत्प्रवर्त्ततामनयोः प्रवीरयोरनवरतमविरललुलितविकटकनकमयकमलकमनीयसंहतिरमरतरुतरुणमुकुलनिकरमकरन्दसुन्दरः पुष्पनिपातः।

विद्याधरी। ता किंति उण अआंडतंडविदुद्दड्डतरलिदतडिच्छडाकडारमम्बरं झत्ति संवुत्तं (१)?

---

(१)। तत् किमिति पुनरकाण्डताण्डवितदुर्दण्डतरलिततडिच्छटाकडारमम्बरं झटिति सम्वृत्तं।

विद्याधरः। तत्किन्नु खल्वद्य,

लाङ्गयन्तभ्रमिभ्रान्तमार्त्तण्डज्योतिरुज्ज्वलः,

पुटभेदो ललाटस्थनीललोहितचक्षुषः।

॥ विचिन्त्य ॥ आं, ज्ञातं; वत्सेन चन्द्रकेतुना प्रयुक्तमस्त्रमाग्नेयं, यस्यायमग्निछटासंपातः। सम्प्रति हि,

अवदग्धकर्वुरितकेतुचामरै

रपयातमेव हि विमानमण्डलैः,

दधति ध्वजाङ्कुशपटाञ्चलेम्विमाः

चणकुङ्कुमच्छुरणविभ्रमं शिखाः।

आश्चर्य्यं, प्रवृत्त एवायमुच्चण्डवज्रखण्डावस्फोटपटुरवस्फुलिङ्गगुरुरुत्तालतुमुललेलिहानज्वालासम्भारभैरवो भगवानुषर्व्बुधः। प्रचण्डश्चास्य सर्व्वतः सन्तापस्तत्प्रियामङ्गेनाच्छाद्य, दूरमपसरामि॥ तथा करोति॥

विद्याधरी। दिट्ठिआ, एदेण विमलमोताफलसीदलसिणिद्धमसिणसोवाणमंसलेन णाहदेहफंसेण, आणन्दमन्दमुकुलिदघुम्मन्तलोअणाए अन्तरिदो ज्जेव सन्तावो (१)।

विद्याधरः। अपि किमत्र मया कृतं, अथवा,

अकिञ्चिदपि कुर्व्वाणः सौख्यैर्दुःखान्यपोहति,

तत्तस्य किमपि द्रव्यं, यो हि यस्य प्रियोजनः।

---

(१)। दिष्ट्या एतेन विमलमुक्ताफलशीतलस्निग्धमसृणसोपानमांसलेन नाथदेहस्पर्शेन, आनन्दमुकुलितघूर्णलोचनाया अन्तरितएव सन्तापः।

विद्दाधरी। कधमविरलविलोलघोलन्तविज्जुल्लदाविला समण्डिदेहिं मत्तमोरकण्ठसामलेहिं, ओछरीअदि णहअलं, जलहरेहिं (१)।

विद्याधरः। हन्त, हन्त; कुमारलवप्रयुक्तवारुणास्त्रप्रभावः खल्वयं; कथमविरलप्रयुक्तवारिधारासंपातैः प्रशान्तं पावकास्त्रं।

विद्याधरी। पिअं मे, पिअं मे (२)।

विद्याधरः। हन्त, हन्त; भो, भोः; सर्व्वमतिमात्रं दोषाय; यत्प्रबलवातावलिचोभगम्भीरगुणगुणायमानमेघमेदुरान्धकारनीरन्ध्रनिबद्धमेकवारविश्वग्रसनविकटविकरालकालकण्ठमुखकन्दरविवर्त्तमानमिवयुगान्तयोगनिद्रानिरुद्धसर्व्वद्वारनारायणोदरनिविष्टमिव भूतजातं प्रवेपते। सा ु ' वत्स चन्द्रकेतो, साधु, स्थाने वायव्यास्त्रमीरितं।

यतः। विद्याकल्पेन मरुता मेघानां भूयसामपि,
ब्रह्मणीव विवर्त्तानां, क्वापि विप्रलयः कृतः।

---

(१) कथमविरलविलोलघूर्णायमानविद्युल्लताविलासमण्डितैर्मत्तमयूरकण्ठश्यामलैरास्तीर्य्यते नभस्तलं जलधरैः।

(२) प्रियं मे, प्रियंमे।

विद्याधरी। णाध, को दाणिं एसो ससंभमुक्खित्तकरभमिदजोत्तञ्चलो, दूरदो ज्जेव मऊरवअणपडिसिद्धजुज्झवावारो एदाणं कुमाराणं अन्तरेण, विमानवरमोदारेदि? (१)

विद्याधरः॥ दृष्ट्वा॥ एष शम्बूकबधात्प्रतिनिवृत्तो रघुपतिः।

शब्दं महापुरुषसंविहितं निशम्य,
तद्गौरवात् समुपसंहृतसंप्रहारः,
शान्तो लवः, प्रणत एव स चन्द्रकेतुः;
कल्याणमस्तु सुतसङ्गमनेन राज्ञः।

॥ इति निष्क्रान्तौ ॥ विष्कम्भकः ॥

ततः प्रविशति रामो लवः प्रणतश्चन्द्रकेतुश्च।

रामः॥ पुष्पकादवतरन्॥

दिनकरकुलचन्द्र, चन्द्रकेतो, सरभसमेहि, दृढं परिष्वजस्व;
तुहिनशकलशीतलैस्तवाङ्गैः शममुपयातु ममापि चित्तदाहः।

---

(१) नाथ क इदानीं एष स सम्भ्रमोत्क्षिप्तकरभ्रमितयोत्राञ्चलो दूरतएव मधुरवचनप्रतिषिद्धयुद्धव्यापार एतयोः कुमारयोरन्तरेण विमानवरमवतारयति।

चन्द्र। अभिवादये।

राम:॥ उत्थाय सस्नेहास्रं परिष्वज्य॥ अपि नाम कुशलं तव दिव्यास्त्रधरदेहस्य।

चन्द्र। कुशलमत्यद्भुतक्रियस्य प्रियदर्शनस्य लवस्याभ्युदयेन। तद्विज्ञापयामि, मामिवाविशेषेण, मत्तः शिवतरेण, चक्षुषा, पश्यत्वमुं महावीरप्रकाण्डं तातः।

रामः॥ लवं निरूप्य॥ दिष्ट्या, अतिकल्याणाकृतिरयं वयसो वत्सस्य।

चातुं लोकानिव परिणतः कायवानस्त्रवेदः,
क्षात्रो धर्म्मः श्रितइव तनुं ब्रह्मघोषस्य गुप्त्यै,
सामर्थ्यानामिव समुदयः, सञ्चयो वा गुणाना
माविर्भूय स्थितइव जगत्पुण्यनिर्म्माणराशिः।

लवः। अहो, पुण्यानुभावदर्शनोऽयं महापुरुषः।

आश्वासस्नेहभक्तीनामेकमालम्बनं महत्।
प्रकृष्टस्येव धर्म्मस्य प्रसादो मूर्त्तिसञ्चरः,

आश्चर्य्यं!

विरोधो विश्रान्तः प्रसरति, रसो निर्वृतिघन
स्तदौद्धत्यं क्वापि व्रजति, विनयः प्रक्र्यति मां
झटित्यस्मिन् दृष्टे किमपि परवानस्मि, यदि वा
महार्घस्तीर्थानामिव हि महतां कोऽप्यतिशयः।

रामः। तत्किमेकपदएव दुःखविश्रामं ददात्युपस्नेहयति च कुतोऽपि निमित्तादन्तरात्मानं; अथवा, स्नेहस्य निमित्तमव्यपेचइति विप्रतिषिद्धमेतत्।

व्यतिषजति पदार्थानान्तरः कोऽपि हेतु
र्न खलु वहिरुपाधीन् प्रीतय. संश्रयन्ते;
विकसति हि पतङ्गस्योदये पुण्डरीकं,
द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः।

लवः। चन्द्रकेतो, कएते?

चन्द्र। प्रियवयस्य, ननु तातपादाएते।

लवः। ममापि तर्हि धर्म्मतस्तथैव यतः प्रियवयस्य इत्यात्थ, किन्तु चत्वारः खलु भवतामेवं व्यपदेशभागिनस्तत्रभवन्तो रामायणकथापुरुषास्तद्विशेषं ब्रूहि।

चन्द्र। ननु ज्येष्ठतातपादाइत्यवेहि।

लवः॥ सोल्लासं॥ कथं रघुनाथएष। दिष्ट्या सुप्रभातमद्य, यदयं देवो दृष्टः॥ सविनयकौतुकं निर्व्वर्ण्य॥ तात, प्राचेतसान्तेवासी लवोऽभिवादयते।

रामः॥ सस्नेहं॥ आयुष्मन्नेह्येहि॥ सस्नेहं परिष्वज्य॥ अपि वत्स, कृतं कृतमतिविनयेन, अनेकवारमपरिश्लथं परिष्वजस्व।

परिणतकठोरपुष्करगर्भच्छदपीनमसृणसुकुमारः,
नन्दयति चन्द्रचन्दननिस्यन्दजडस्तव स्पर्शः।

लवः ॥ स्वगतं ॥ दृष्टशोऽस्माद्दृशान् प्रति अमीषामकारणस्नेहः, मया पुनरेभ्यएवाभिद्रुग्धमज्ञेन, यदायुधपरिग्रहं यावदत्यारूढो दुर्योगः ॥ प्रकाशं ॥ मृष्यन्त्विदानीं लवस्य बालिशतां तातपादाः।

रामः। किमपराद्धं वत्सेन।

चन्द्र। अश्वानुयात्रिकेभ्यस्तातप्रतापाविष्करणमुपश्रुत्य वीरायितमनेन।

रामः। नन्वयमलङ्कारः क्षत्रस्य।

न तेजस्तेजस्वी प्रसृतमपरेषां प्रसहते,
स तस्य स्वो भावः प्रकृतिनियतत्वादकृतकः;
मयूखैरश्रान्तं तपति यदि देवो दिनकरः,
किमाग्नेयो ग्रावा निकृतइव तेजांसि वमति।

चन्द्र। तात, अमर्षोऽप्यस्यैव शोभते वीरस्य; परन्तु हि तात, प्रियवयस्यविनियुक्तजृम्भकास्त्रनिष्कम्पस्तम्भितानि सर्व्वतः सैन्यानि।

रामः ॥ विलोक्य ॥ वत्स, लव, संह्रियन्तामस्त्राणि; त्वमपि चन्द्रकेतो, निर्व्यापारविलक्षितानि सान्त्वय बलानि।

लवः ॥ प्रणिधानं नाटयति ॥

चन्द्र। यथादिष्टमिति ॥ निष्क्रान्तः ॥

लवः। प्रशान्तमस्त्रं।

रामः। वत्स, सरहस्यजृम्भकप्रयोगसंहरणान्यस्त्राणि आम्नायवन्ति।

ब्रह्मादयो ब्रह्महिताय तप्त्वा परःसहस्राः शरदस्तपांसि,
एतान्यपश्यन् गुरवः पुराणाः स्वान्येव तेजांसि तपोमयानि।

अथैतन्मन्त्रपारायणोपनिषदं भगवान् कृशाश्वः, परःसहस्रपरिवत्सरान्तेवासिने कौशिकाय विश्वामित्राय प्रोवाच, स तु भगवान् मह्यमित्येष तु पूर्वानुक्रमः; कुमारकस्य पुनः कुतः सम्प्रदाय इति पृच्छामि।

लवः। स्वतःप्रकाशान्यावयोरस्त्राणि।

रामः ॥ विचिन्त्य ॥ प्रकृष्टपुण्यपरिपाकोपादानः ऽपि महिमा स्यात्? द्विवचनन्तु कथं?

लवः। भ्रातरावावां यमजौ।

रामः। स तर्हि द्वितीयः क्व?

नेपथ्ये॥ भाण्डायन, भाण्डायन।

आयुष्मतः किल लवस्य नरेन्द्रसैन्यै
रायोधनं ननु किमात्थ सखे तथेति
अद्यास्तमेतु भुवनेष्वधिराजशब्दः;
क्षत्रस्य शस्त्रशिखिनः शममद्य यान्तु।

राम:। अथ कोऽयमिन्द्रमणिमेचकच्छवि

ध्वनिनैव दत्तपुलकं करोति मां?

नवनीलनीरधरधीरगर्ज्जित:

क्षणबद्धकुड्मलकदम्बडम्बरं।

लव:। अयमसौ मम ज्यायानार्य्य: कुशो नाम, भरताश्रमात्प्रतिनिवृत्त:।

राम:। सकौतुकं॥ वत्स, इत एवाह्वयैनमप्यायुष्मन्तं।

लव:। एवमिति परिक्रामति॥

॥ तत: प्रविशति कुश: ॥

कुश:। साद्भुतहर्षधैर्य्यं धनुरास्फालयन्॥

दत्तेन्द्राभयदक्षिणैर्भगवतो वैवस्वतादामनो

र्दृप्तानां दहनाय दीपितनिजक्षत्रप्रतापाग्निभि:,

आदित्यैर्यदि विग्रहो नृपतिभिर्धन्यं ममैतत्ततो

दिव्यास्त्रस्फुरदुग्रदीधितिशिखानीराजितज्यं धनु:।

॥ विकटं परिक्रामति ॥

राम:। कोऽप्यस्मिन् क्षत्रियपोतके पौरुषातिरेक:।

दृष्टिस्तृणीकृतजगत्त्रयसत्वसारा;

धीरोद्धता नमयतीव गतिर्द्धरित्रीं;

कौमारकेऽपि गिरिवद्गुरुतां दधानो,

वीरो रस: किमयमेत्युत दर्पएव।

लव:॥ उपसृत्य॥ जयत्यार्य्य:।

कुशः। नन्वायुश्मन्, किमियं वार्त्ता ; युद्धं युद्धमिति।

लवः। यत्किञ्चिदेतदुरुदृप्तभावमुत्सृज्यार्य्योऽस्मिन् विनयेन वर्त्ततां।

कुशः। किमर्थं?

लवः। अत्र देवो रघुपतिस्तिष्ठति। सच स्निह्यत्यावयोरु त्कण्ठते च युष्मत्सन्निकर्षस्य।

कुशः॥ सतर्कं॥ स रामायणकथानायको; ब्रह्मघोषस्य गोपायिता।

लवः। अथकिं।

कुशः। आशंसनीयपुण्यदर्शनः स महात्मा किन्तु कथम स्माभिरुपगन्तव्यइति न सम्प्रधारयामि।

लवः। यथा गुरुस्तथोपचारेण।

कुशः। अपि कथं नामैतत्।

लवः। अत्युदात्तसुजनश्चन्द्रकेतुरौर्म्मिलेयः, प्रियवयस्य, इति सख्येन मामुपतिष्ठते; तेन, तत्सम्बन्धेन च, धर्म्मतात एवायं राजर्षिरिति।

कुशः। संप्रति करणीयो राजन्येऽपि प्रश्रयः।

लवः। पश्यत्वेनमाकारानुभावगाम्भीर्य्यसम्भाव्यमानवि विधलोकोत्तरचरितातिशयमार्य्यो महापुरुषं।

कुशः॥ निर्व्वर्ण्य॥

अहोमामोदिकं रूपमनुभावस्च पावनः!
स्थाने रामायणकविर्द्देवीं वाचं व्यवीवृणत्।

॥ उपसृत्य ॥ तात, प्राचेतसान्तेवासी कुशोऽभिवादयते।

रामः। एह्यायुष्मन्।

अमृताध्मातजीमूतस्निग्धसंहननस्य ते,
परिष्वङ्गस्य वात्सल्यादयमुत्कण्ठते जनः॥

॥ परिष्वज्य स्वगतं॥ तत्किमपत्यमयं दारकः?

अङ्गादङ्गाच्युतइव निजस्नेहजो देहसारः,
प्रादुर्भूय स्थितइव वहिश्चेतनाधातुरेव;
सान्द्रानन्दक्षुभितहृदयप्रस्रवेणावसृष्टो
गात्रश्लेषे यदमृतरसस्रोतसा सिञ्चतीव।

लवः। तात, ललाटन्तपो घर्म्मदीधितिस्तदत्र शालच्छाये मुहूर्त्तमासनपरिग्रहं करोतु तातः।

रामः। यदभिरुचितं वत्साय ॥ परिक्रम्योपविशन्ति ॥

रामः ॥ स्वगतं॥

अहो प्रश्रययोगेऽपि गतिस्थित्यासनादयः,
साम्राज्यशंसिनो भावाः, कुशस्य च लवस्य, च।

वपुरविहितसिद्धा एव लक्ष्मीविलासाः,
प्रतिजनकमनीयं कान्तिमुत्केतयन्ति;
अमलिनमिव रत्नं रश्मयस्ते मनोज्ञा,
विकसितमरविन्दं विन्दवो माकरन्दाः

भूयिष्ठञ्च रघुकुमारच्छायामनयोः पश्यामि ?

कठोरपारावतकण्ठमेचकं, वपुर्वृषस्कन्धमवन्धुरांसयोः,
प्रसन्नसिंहस्तिमितञ्च वीचितं, ध्वनिश्च माङ्गल्यमृदङ्गमांसलः।

॥ सूक्ष्मं निरूप्य ॥ अयि न केवलमस्मदङ्गसंवादिन्याकृतिः ।

अपि जनकसुतायास्तच्च तच्चानुरूपं,
स्फुटमिह शिशुयुग्मे नैपुणोन्नेयमस्ति;
ननु पुनरिव तन्मे गोचरीभूतमक्ष्णो
रभिनवशतपत्रश्रीमदास्यं प्रियायाः।

मुक्ताच्छदन्तच्छविदन्तुरेयं, सैवाष्ठमुद्रा, स च कर्णपाशः,
नेत्रे पुनर्यद्यपि रक्तनीले, तथापि सौभाग्यगणः स एव।

तदेतत् प्राचेतसाध्युषितमरण्यं, यत्र किल देवी परित्यक्ता, इयं चानयोराकृतिर्वयश्च। यदपि, स्वतःप्रकाशान्यस्त्राणीति तत्र विमृषामि; अपि खलु तच्चित्रदर्शनप्रासङ्गिकमस्त्राभ्यनुज्ञानमुद्भूतं स्यात, नह्यसांप्रदायिकान्यस्त्राणीति पूर्व्वेषामप्यनुश्रुश्रमः; अयञ्च संप्लवमानमात्मानं सुखातिशयो हृदयस्य मे विश्र लभते; भूयिष्ठञ्च, मया द्विधा प्रतिपन्नो देव्या गर्भिणीभाव आसीत्॥ सास्रं॥

पुरा रूढे स्नेहे परिचयविकासादुपचिते
रहोविस्रब्धाया अपि सहजलज्जाजडदृशः;
मयैवादौ ज्ञातः करतलपरामर्शकलया
द्विधा मर्म्मग्रन्थिस्तदनु दिवसैः कैरपि तया?

॥ रुदित्वा॥ तत्किमेतौ पृच्छामि केनाप्युपायेन।

लवः। तत्किमेतत्।

वाष्पवर्षेण नीतं वो जगन्मङ्गलमाननं;

अवश्यायावसिक्तस्य पुण्डरीकस्य चारुतां।

कुशः। अयि वत्स;

विना सीतादेव्या किमिव हि न दुःखं रघुपतेः;

प्रियानाशे कृत्स्नं किल जगदरण्यं हि भवति;

स च स्नेहस्तावानयमपि वियोगो निरवधिः;

किमित्येवं पृच्छस्यनधिगतरामायणइव।

रामः॥ स्वगतं॥ अये तटस्थित आलापः; कृतं प्रश्नेन। दग्धहृदय कोऽयमाकस्मिकः स्नेहपरिस्नवो विकारः?, एवञ्च निर्भिन्नहृदयावेगः शिशुजनेनाप्यनुकम्पितोऽस्मि; भवतु ताव दन्तरयामि॥ प्रकाशं॥ वत्सौ, रामायणमिति श्रूयते, भगवतो वाल्मीकेः सरस्वतीनिस्यन्दः, प्रशस्तिरादित्यवंशस्य; तत्र कौतू हलेन यत्किञ्चिच्छ्रोतुमिच्छामि।

कुशः। स कृत्स्नएव सन्दर्भोऽस्माकमावृत्तः; स्मृतिप्रत्युप स्थितौ तावदिमौ बालचरितस्यान्तेऽध्याये द्वौ श्लोकौ।

रामः। उदीरयतु वत्सः।

कुशः। प्रकृत्यैव प्रिया सीता रामस्यासीन्महात्मनः;

प्रियभावः सतु तया स्वगुणैरेव वर्द्धितः;

तथैव रामः सीतायाः प्राणेभ्योऽपि प्रियोऽभवत्;
हृदयं त्वेव जानाति प्रीतियोगं परस्परं। इति।

रामः। कष्टमतिदारुणो हृदयमर्म्मोपघातः, हा देवी, एवं किल तदासीत्। अहो निरन्वयविपर्य्यासविरसवृत्तयो विप्रलम्भपर्य्यवसायिनस्तापयन्ति संसारवृत्तान्ताः।

क्व तावानानन्दो निरतिशयविस्रम्भबहुलः,
क्व तेऽन्योन्यं यत्नाः, क्व च न गहनाः कौतुकरसाः;
सुखे वा दुःखे वा क्व नु खलु तदैक्यं हृदययो
स्तथाप्येष प्राणः स्फुटति, न तु पापो विरमति।

भाः कष्टं।

प्रियागुणसहस्राणामेकोन्मीलनपेशलः,
यएव दुःस्मरः कालस्तमेव स्मारितावयम्।
तदा किञ्चित्किञ्चित्कृतपदमहोभिः कतिपयै
स्तदीषद्विस्तारिस्तनयुगलमासीन्मृगदृशः;
वयः स्नेहाकूतव्यतिकरघनो यत्र मदनः,
प्रगल्भव्यापारः स्फुरति हृदि मुग्धस्य वपुषि।

कुशः। अयञ्च मन्दाकिनीचित्रकूटवनविहारे सीतादेवी मुद्दिश्य रघपतेः श्लोकः।

त्वदर्थमिव विन्यस्तः शिलापादोऽयमग्रतः,
यस्यायमभितः पुष्पैः प्रवृष्टइव केसरः।

रामः ॥ सलज्जितस्नेहकरुणं ॥ अति नामायं मुग्धः शिशुजनो विशेषतस्त्वरण्यचरः। हा देवि, स्मरसि वा तस्य प्रदेशस्य तत्समयविस्रम्भातिशयप्रसङ्गस्य ; भोः कष्टं!

अमाम्बुशिशिरीभवत्प्रसृतमन्दमन्दाकिनी,
मरुत्तरलितालकाकुललालाटचन्द्रद्युति ;
अकुङ्कुमकलङ्कितोज्ज्वलकपोलमुत्प्रेक्ष्यते,
निराभरणसुन्दरश्रवणपाशसौम्यं मुखं।

॥ स्तम्भितइव स्थित्वा ॥ सकरुणं ॥ अहो नु खलु भोः।

चिरं ध्यात्वा, ध्यात्वा, निहितइव निर्माय परतः,
प्रवासेऽप्याश्वासं न खलु न करोति प्रियजनः
जगज्जीर्णारण्यं भवति, हि, विकल्पव्युपरमे,
कुकूलानां राशौ तदनु हृदयं पच्यत इव।

नेपथ्ये ॥

वशिष्ठो, वाल्मीकिर्दशरथमहिष्योऽथ, जनकः,
सहैवारुन्धत्या शिशुकलहमाकर्ण्य सभयाः,
जराग्रस्तैर्गात्रैरथ खलु विदूराश्रमतया
चिरेणागच्छन्ति, त्वरितमनसोऽपि श्रमजडाः।

रामः। कथं, भगवन्तावरुन्धतीवशिष्ठौ, अम्बा, जनकश्चात्रैव कथं खल्वेते द्रष्टव्याः॥ सकरुणं विलोक्य॥ अहह, ताततजनकस्तु दैवादत्रैवायातइति वज्रेणैव ताडितोऽस्मि मन्दभाग्यः।

सम्बन्धस्पृहणीयताप्रमुदितैर्जुष्टं वशिष्ठादिभि
ईष्टापत्यविवाहमङ्गलमहो तत्तातयोः सङ्गतं,
पश्यन्नीदृशमीदृशे पितृसखं वृत्ते महावैशसे
दीर्य्ये किं न सहस्रधाहमथ वा रामेण किं दुष्करं।

नेपथ्ये ॥ कष्टं कष्टं ॥

अनुभावमात्रसमुपस्थितश्रियं सहसैव वीक्ष्य रघुनाथमीदृशं,
प्रथमप्रमूढजनकप्रबोधनाद्विधुराः प्रमोहमुपयान्ति मातरः।

रामः। हा तात, हा मातरः, हा जनक ;

जनकानां रघूणाञ्च यत्कृत्स्नं गोत्रमङ्गलं,
तस्मिन्नकरुणे पापे वृथा वः करुणा मयि।

यावत्संभावयामि ॥ इत्युत्तिष्ठन्ति ॥

कुशलवौ। इतइतस्तातः ॥ सकरुणाकुलं परिक्रम्य सर्व्वे निष्क्रान्ताः ॥

॥ कुमारप्रत्यभिज्ञानो नाम षष्ठोऽङ्कः ॥

अथ सप्तमोऽङ्कः।

ततः प्रविशति लक्ष्मणः।

लक्ष्मणः। भो भोः, किन्न खलु भगवता वाल्मीकिना सब्रह्म क्षत्रपौरजानपदाः प्रजाः सहास्माभिराहूय, कृत्स्नएव सदेवासुरमनुष्यतिर्य्यगुरगनायकनिकायसन्तानस्य जङ्गमो भूतग्रामः स्वप्रभावेण सन्निधापितः। आदिष्टश्चाहमार्य्येण; वत्स लक्ष्मण, भगवता वाल्मीकिना स्वकृतिमप्सरोभिः प्रयुज्यमानां द्रष्टुमुपनिमन्त्रिताः स्मः, तद्गङ्गातीरमातोद्यस्थानमुपगम्य, क्रियतां समाजसन्निवेशइति। कृतश्च मर्त्यामर्त्यस्य भूतग्रामस्य समुचितस्थाने समुपवेशसङ्गो मया; अयन्तु,

राज्याश्रमनिवासेऽपि प्राप्तकष्टमुनिव्रतः,
वाल्मीकिगौरवादार्य्यं, इतएवाभिवर्त्तते।

ततः प्रविशति रामः।

रामः। वत्स लक्ष्मण, अपि स्थिता रङ्गप्रेक्षकाः।

लक्ष्म। अथकिं।

रामः। इमौ पुनर्वत्सौ कुशलवौ चन्द्रकेतुसदृशीं स्थानप्रतिपत्तिं लम्भयितव्यौ।

लक्ष्म। प्रभुस्नेहप्रत्ययात्तथैव कृतं; इदं त्वास्तीर्णं राजासनं, उपविशत्वार्य्यः।

रामः ॥ उपविशति॥ उभावुपविशतः॥

रामः। प्रस्तूयतां भोः।

॥ प्रविश्य सूत्रधारः॥ भगवान् भूतार्थवादी प्राचेतसः, सजङ्गमस्थावरं जगदाज्ञापयति, यदिदमस्माभिरार्षेण चक्षुषा समुद्वीक्ष्य पावनकरुणाद्भुतरसं किञ्चिदुपनिबद्धं, तत्र कार्य्य गौरवादवधातव्यमिति।

रामः। एतदुक्तं भवति। साक्षात्कृतधर्म्माण ऋषयस्तेषामृतसाराणि भगवतां परोरजांसि प्रज्ञानानि, न कचिद्व्याहन्यन्त इतत्यनभिशङ्कनीयानीति।

नेपथ्ये।

हा अज्जउत्त, हा कुमार लक्खण; एआइणिं मन्दभाइणिं असरणं अरण्णे आसण्णप्पसववेअणं हदासं सावजा मं अहिलसन्ति; सा दाणिं मन्दभाइणी भाईरधीए अत्ताणअं णिक्खिविस्सं (१)।

---

(१) हा आर्य्यपुत्र, हा कुमार लक्ष्मण, एकाकिनीं मन्दभाग्यां अशरणां अरण्ये आसन्नप्रसववेदनां हताशां श्वापदा मामभिलषन्ति; सेदानीं मन्दभागिनी भागीरथ्यामात्मानं निक्षिप्यते।

लक्ष्म। आत्मगतं ॥ कष्टं वतान्यदेव किमपि?

सूत्र। विश्वम्भरात्मजा देवी राज्ञा त्यक्ता महावने,

प्राप्तप्रसवमात्मानं गङ्गादेव्यां विमुञ्चति।

॥ इति सूत्रधारो निष्क्रान्तः ॥

रामः। देवि, क्षणमपेक्षस्व।

लक्ष्म। आर्य्य, नाटकमिदं, नाटकमिदं।

रामः। हा देवि, दण्डकारण्यवासप्रियसखि, एष ते रामाद्दैवदुर्विपाकः।

लक्ष्म। आर्य्य, दृश्यतां तावत् प्रबन्धार्थः।

रामः। एष सज्जोऽस्मि वज्रमयः।

॥ ततः प्रविशत्युत्सङ्गितैकैकदारकाभ्यां पृथ्वीगङ्गाभ्यामवलम्बिता सीता ॥

रामः। वत्स, लक्ष्मण, असंविज्ञातमनिबन्धनं तमइव प्रविशामि, धारय मां।

गङ्गा। समाश्वसिहि, कल्याणि, दिष्ट्या वैदेहि वर्द्धसे,

अन्तर्ज्जलं प्रसूतासि रघुवंशधरौ सुतौ।

सीता ॥ समाश्वस्य ॥ दिठ्ठिआ दारके पसूदह्मि, हा अज्ज उत्त ॥ इति मूर्च्छति ॥ (१)।

---

(१)। दिष्ट्या दारकौ प्रसूतास्मि, हा आर्य्यपुत्त्र।

लक्ष्म ॥ पादयोर्निपत्य ॥ आर्य्यार्य्ये, दिष्ट्या वर्द्धामहे; कल्याणप्ररोहो रघुवंशः ॥ विलोक्य ॥ हा, हा; कथं क्षुभितवाष्योत्पीडनिर्भरः, प्रमुग्ध एवार्य्यः ॥ इति वीजयति ॥

देव्यौ। वत्से, समाश्वसिहि, समाश्वसिहि।

सीता॥ आश्वस्य ॥ भअवदि, का तुमं, इत्रं अ? (१)

पृथ्वी। इयं ते श्वशुरकुलदेवता भागीरथी।

सीता। भअवदि, णमो दे, णमो दे (२)।

भागी। चारित्रोपचितां कल्याणसम्पदमनुगच्छ।

लक्ष्म। अनुगृहीताः स्मः।

भागी। इयन्तु जननी ते वसुन्धरा।

सीता। हा अम्ब, ईदिसी अहं तए दिट्ठा (३)।

पृथ्वी। एहि वत्से, एहि पुत्रि॥ इति सीतामालिङ्ग्य मूर्च्छति॥

लक्ष्म ॥ सहर्षं ॥ पृथ्वीगङ्गाभ्यामभ्युपपन्ना आर्य्या।

रामः ॥ अवलोक्य ॥ दिष्ट्या खल्वेतत् करुणतरं वर्त्तते; विश्वम्भरापि नाम व्यथते, इति जितमपत्यस्नेहेन, यद्वा सर्व्वसाधारणो ह्येष मानसो मोहग्रन्थिरन्तश्चरश्चेतनावतानुपप्लवः संसारतन्तुः।

---

(१)। भगवति, का त्वं, इयञ्च?

(२)। भगवति, नमस्ते, नमस्ते।

(३) हा अम्ब; ईदृशी अहं त्वया दृष्टा।

गङ्गा। वत्से वैदेहि, देवि, भूतधात्रि, समाश्वसिहि।

पृथ्वी॥ आश्वस्य॥ देवि, सीतां प्रसूय कथमाश्वसिमि? एकश्चिरं राक्षसमध्यवासः साङ्गो, द्वितीयश्च सुदुःश्रवोऽस्याः।

भागी। को नाम पाकाभिमुखस्यजन्तोर्द्वाराणि दैवस्य पिधातुमीष्टे?

पृथ्वी। भागीरथि, सद्दशमुक्तं। युक्तमेतद्वा रामभद्रस्य।

न प्रमाणीकृतः पाणिर्बाल्ये बालेन पीडितः;
नाहं, न जनको, नाग्निर्नानुवृत्तिर्न सन्ततिः।

सीता। अज्ज उत्तं सुमराविदह्मि? (१)

पृथ्वी। आः कस्तवार्य्यपुत्रः?

सीता॥ सलज्जास्रं॥ जधा वा, अम्बा भणादि (२)।

रामः। अम्ब पृथ्वि, ईदृशोऽस्मि।

गङ्गा। भगवति वसुन्धरे, शरीरमसि संसारस्य, तत्कि मसम्विदानेव जामात्रे कुप्यसि?

घोरं लोके विततमयशो, या च वह्नौ विशुद्धि
र्लङ्काद्वीपे कथमिव जनस्तामिह श्रद्दधातु;
इक्ष्वाकूणां कुलधनमिदं, यत्समाराधनीयः,
कृत्स्नो लोकस्तदतिगहनं किं स वत्सः करोतु?

---

(१)। हा आर्य्यपुत्रं स्मारितास्मि।

(२)। यथा वा अम्बा भणति।

लक्ष्म। अव्याहतान्तःप्रकाशा हि देवता भूतेषु; विशेषेण गङ्गा; तथाप्येष तेऽञ्जलिः।

रामः। अम्ब, अनुवृत्तस्त्वया भगीरथगृहे प्रसादः।

पृथ्वी। देवि, नित्यप्रसन्नास्मि वः किन्त्वापातदुःसहस्नेहस्य वेगेनैवं ब्रवीमि, न पुनर्न जानामि सीतास्नेहं रामभद्रस्य।

दह्यमानेन मनसा दैवाद्वत्सां विहाय सः।
लोकोत्तरेण सत्वेन प्रजापुण्यैश्च जीवति।

रामः। सकरुणा हि गुरवो गर्भरूपेषु।

सीता॥ रुदती कृताञ्जलिः॥ णेदु मं अत्तणो अङ्गेसु विलअं अंवा (१)।

रामः। किमन्यद्ब्रवीतु।

गङ्गा। शान्तं; अविलीना वत्सरसहस्राणि भूयाः।

पृथ्वी। वत्से, अपि रक्षणीयौ ते पुत्रकौ।

सीता। अणाधाह्मि (२)।

रामः। हृदय वज्रमयमसि।

गङ्गा। कथं त्वं सनाथाप्यनाथा।

सीता। कीदिसी मम अभव्वाए सणाधत्तणा (३)।

---

(१)। नयतु मामात्मनोऽङ्गेषु विलयं, अम्बा।

(२)। अनाथास्मि।

(३)। कीदृशी ममाभव्यायाः सनाथता।

देव्यौ। जगन्मङ्गलमात्मानं कथं त्वमवमन्यसे?

आवयोरपि यत्सङ्गात् पवित्रत्वं प्रकृष्यते।

लक्ष्म। आर्य्य, श्रुतं।

रामः। शृणोतु लोकः।

॥ नेपथ्ये कलकलः॥

रामः। अद्भुततरं किमपि?

सीता। किंत्ति अन्तरिक्खं पज्जाउलं? (१)

देव्यौ। ज्ञातं।

कृशाश्वः कौशिको रामइति येषां गुरुक्रमः,

आविर्भवन्ति तान्येव शस्त्राणि सह जृम्भकैः।

॥ नेपथ्ये ॥

देवि सीते, नमस्तेऽस्तु, गतिर्नः पुत्त्रकौ हि ते;

आलेख्यदर्शने देवो, यदाह रघुनन्दनः।

सीता। दिट्ठिआ अत्थदेवदाओ परिप्फुरन्ति (२)।

लक्ष्म। उक्तमासीदार्य्येण, सर्व्वथेदानीं त्वत्प्रसवमुपस्थास्यन्तीति।

देव्यौ। नमो वः परमास्त्रेभ्यो, राघवस्य परिग्रहात्,

अनुध्यातैरुपेतव्यं वत्सयोर्भद्रमस्तु वः।

---

(१) किमिति अन्तरीक्षं पर्य्याकुलं।

(२)। दिष्ट्या अस्त्रदेवताः परिस्फुरन्ति।

रामः। क्षुभिताः कामपि दशां कुर्व्वन्ति मम साम्प्रतं,
विस्मयानन्दसन्दर्भजर्जराः करुणोर्म्मयः।

देव्यौ। मन्यस्व, वत्से, रामभद्रतुल्याविदानीन्ते पुत्रकौ सवृत्तौ।

सीता। भअवदीओ, को एदाणं खत्तिओचिदं कम्म करइस्सदित्ति (१)?

रामः। एषां वशिष्ठगुप्तानां रघूणां वंशवर्द्धिनी,
कष्टं, सीतापि, सुतयोः संस्कर्त्तारं न विन्दति।

देव्यौ। पुत्रि, किं तवानया चिन्तया? एतौ हि वत्सौ स्तन्यत्यागात्परेण भगवतो वाल्मीकेरर्पयिष्यावः; स एवैतयोः क्षत्रकृत्यं करिष्यति।

यथा वशिष्ठाङ्गिरसावृषी प्राचेतसस्तथा;
जनकानां रघूणाञ्च वंशयोरुभयोर्गुरुः।

रामः। सुविचिन्तितं भगवतीभ्यां।

लक्ष्म। आर्य्य, सत्यं विज्ञापयामि, तैस्तैरुपायैर्वत्सौ कुशलवावुत्प्रेक्षे।

एतौ हि जन्मसिद्धास्त्रौ जातौ; प्राचेतसान्मुनेः,
वीरौ सम्प्राप्तसंस्कारौ; वयसा द्वादशाब्दिकौ।

रामः। वत्स, इति परिप्लवमानहृदयः सम्मुग्धोऽस्मि।

---

(१)। भगवत्यौ, कः एतयोः क्षत्रियोचितं कर्म्म करिष्यति?

पृथ्वी। एहि वत्से, पवित्रीकुरु रसातलं।

रामः। हा प्रिये, लोकान्तरमसि गता?

सीता। णेदु मं अत्तणो अङ्गेसु विलअं अम्बा, ण सक्कम्हि ईदिसं जीअलोअपरिवुत्तं अणुभविदुं (१)।

रामः। किमुत्तरं स्यात्।

पृथ्वी। स्तन्यत्यागं यावन्मन्नियोगतः पुत्रकयोरपेचस्व परेण ते यथा रोचिष्यते।

गङ्गा। एवं नाम।

॥ ततो निष्क्रान्ता गङ्गा पृथ्वी, सीताः ॥

रामः। कथं विलयएव वैदेह्याः सम्पन्नः। हा देवि, दण्डकारण्यवासप्रियसखि, हा चारित्रदेवते, लोकान्तरं पर्य्यवसितासि, ॥ इति मुह्यति ॥

लक्ष्म। भगवन्वाल्मीके, परित्रायस्व, एष ते काव्यार्थः। नेपथ्ये॥ अपनीयतामातोद्यकं। भो भोः, सजङ्गमस्थावराः प्राणभृतो मर्त्यामर्त्याः, पश्यत, महर्षिणा भगवता वाल्मीकिना अनुज्ञातं पवित्रमाश्चर्य्यं।

लक्ष्म ॥ विलोक्य ॥

मन्थादिव चुभ्यति गाङ्गमम्भो, व्याप्तञ्च देवर्षिभिरन्तरीचं,
आश्चर्य्यमार्य्या सह देवताभ्यां गङ्गामहीभ्यां सलिलादुपैति।

---

(१)। नयतु मामात्मनोऽङ्गेषु विलयं अम्बा, न शक्तास्मि ईदृशं जीवलोकपरिवर्त्तमनुभवितुं।

पुनर्नेपथ्ये ॥

अरुन्धति जगद्वन्द्ये, गङ्गापृथ्व्यौ भजस्व नौ,

अर्पितेयं तवाभ्यासे सीता पुण्यव्रता वधूः ।

लक्ष्म। दिष्ट्या, अहो आश्चर्य्यं आश्चर्य्यं, आर्य्यार्य्य, पश्य, पश्य। कष्टमद्यापि नोच्छ्वसित्यार्य्यः।

॥ ततः प्रविशत्यरुन्धती सीता च ॥

अरु। त्वरस्व वत्से वैदेहि, मुञ्च शालीनशीलतां,

एहि, जीवय मे वत्सं, प्रियस्पर्शेन पाणिना ।

सीता ॥ ससम्भ्रमं स्पृशन्ती ॥ समस्ससिदु, अज्जउत्तो (१)।

रामः ॥ समाश्वस्य सानन्दं ॥ भोः किमेतत् ॥ दृष्ट्वा सहर्षाद्भुतं॥ कथं देवी ॥ सलज्जस्मितं ॥ अम्बा अरुन्धती, सर्व्वे प्रहृष्यदृष्यशृङ्गशान्तासमेता गुरवः।

अरु। वत्स, एषा भगीरथगृहदेवता सुप्रसन्ना गङ्गा।

नेपथ्ये॥ जगत्पत रामचन्द्र, स्मर्य्यताम लेख्यदर्शने मां प्रत्यात्मनो वचनं; यथा सात्वमम्ब धर्म्मतः स्नुषायामरुन्धतीव सीतायां शिवानुध्यानपरा भवेति, तत्रानृणास्मि जाता।

अरु। इयं ते श्वश्रूर्भगवती वसुन्धरा।

---

(१५)। समाश्वसितु आर्य्यपुत्तः।

नेपथ्ये। उक्तञ्च पूर्व्वमायुष्मता वत्सात्यागे; यथा, भगवति वसुन्धरे श्लाघ्यां दुहितरमवेचस्व जानकीं, तदनु नाकृतवचनास्मि प्रभोर्वत्सस्येति।

रामः। कथं कृतमहापराधो भगवतीभ्यामनुकम्पितः प्रणमामि।

अरु। भो भोः पौरजानपदा, भगवतीभ्यां जाह्नवीवसुन्धराभ्यामेवं प्रशस्यमाना, मम अरुन्धत्याः समर्पिता, पूर्व्वञ्च भगवता वैश्वानरेण निर्णीतपुण्यचारित्रा, सब्रह्मकैश्च देवैः संस्तुता, सावित्रदेवकुलवधूर्देवयजनसम्भवा सीता, देवी, परिगृह्यतामिति; कथं भवन्तो मन्यन्ते।

लक्ष्म। एवमार्य्ययाऽरुन्धत्या निर्भर्त्सिताः प्रजाःकृत्स्नश्च भूतग्राम आर्य्यां नमस्करोति; लोकपालाश्च, सप्तर्षयश्च पुष्प, वृष्टिभिरुपतिष्ठन्ते।

अरु। जगत्पते रामभद्र,

नियोजय यथाधर्म्मं प्रियां त्वं धर्म्मचारिणीं,
हिरण्मय्याः प्रतिकृतेः पुण्यप्रकृतिमध्वरे।

सीता ॥ स्वगतं ॥ जाणादि, अज्जउत्त, सीतादुक्खं प्पमज्जिदुं(१)।

---

(१)। जानासि आर्य्यपुत्त्र सीतादुःखं प्रमार्जितुं।

रामः। यथा भगवत्यादिशति।

लक्ष्म। कृतार्थोऽस्मि।

सीता। जीविदह्मि (१)।

लक्ष्म। आर्य्ये, एष निर्लज्जो लक्ष्मणः प्रणमति

सीता। वच्छ, ईदिसोवि चिरञ्जीव (२)।

अरु। भगवन् वाल्मीके उपनीयेतामिमौ सीतागर्भसम्भूतौ रामभद्रस्य कुशलवौ ॥ इति निष्क्रान्ता ॥

रामलक्ष्मणौ। दिष्ट्या तथैव तत्।

सीता ॥ सवाष्पाकुला ॥ कहिं ते पुत्तका मे (३)।

॥ ततः प्रविशति वाल्मीकिः कुशलवौ च ॥

वाल्मी। वत्सौ कुशलवौ, एष रघुपतिः पिता युवयोः; लक्ष्मणः कनिष्ठतातः, सीतादेवी जननी, एष राजर्षिर्जनको मातामहः।

सीता ॥ सहर्षकरुणाद्भुतं विलोक्य ॥ कधं तादो (४)।

कुशलवौ॥ हा तात, हा अम्ब, हा मातामह।

---

(१)। जीवितास्मि।

(२)। वत्स ईदृशोऽपि चिरञ्जीव।

(३)। कुत्र तौ पुत्रकौ मे।

(४)। कथं तातः।

रामलक्ष्मणौ॥ सहर्षमालिङ्ग्य॥ ननु वत्सौ,पुण्यैः प्राप्ता स्थः।

सीता। एहि जाद,कुश, एहि जाद लव,चिरस्स परिस्वजध पुणो जन्मन्तरगदं जणणिं (१)।

कुमारा॥ तथा कृत्वा॥ धन्यौ स्वः।

सीता। भअवं पणमामि (२)।

वाल्मी॰ ईदृश्येव चिरं भूयाः।

सीता। अह्महे तादो, कुलगुरू, अज्जाअणो, सभत्तुका अज्जा सान्ता देवी, सलक्खणा सुप्पसणा अज्जउत्तचलणा,समं कुसलवावि दीसंत्ति, ता णिब्भरह्मि आणन्देण (३)।

॥ नेपथ्ये कलकलः॥

वाल्मी॥ उत्थायालोक्य च॥ उपहतलवणो मधुरेश्वरः प्राप्तः।

लक्ष्म। सानुषङ्गानि कल्याणानि।

---

(१) एहि जात कुश, एहि जात लव, चिरस्य परिष्वजस्व पुनर्जन्मान्तरगतां जननीं।

(२) भगवन् प्रणमामि।

(३) तातः कुलगुरुः,आर्य्याजनः, सभर्तृका, आर्य्या शान्ता देवी,सुलक्ष्मणाः सुप्रसन्ना आर्य्यपुत्त्रचरणाः समं कुशलवावपि दृश्यते, तन्निर्भरास्मि आनन्दे।

रामः। यथा भगवत्यादिशति।

लक्ष्म। कृतार्थोऽस्मि।

सीता। जीविदह्मि (१)।

लक्ष्म। आर्य्ये, एष निर्लज्जो लक्ष्मणः प्रणमति

सीता। वच्छ, ईदिसोवि चिरञ्जीव (२)।

अरु। भगवन् वाल्मीके उपनीयेतामिमौ सीतागर्भसम्भूतौ रामभद्रस्य कुशलवौ ॥ इति निष्क्रान्ता ॥

रामलक्ष्मणौ। दिष्ट्या तथैव तत्।

सीता ॥ सवाष्पाकुला ॥ कहिं ते पुत्तका मे (३)।

॥ ततः प्रविशति वाल्मीकिः कुशलवौ च ॥

वाल्मी। वत्सौ कुशलवौ, एष रघुपतिः पिता युवयोः; लक्ष्मणः कनिष्ठतातः, सीतादेवी जननी, एष राजर्षिर्जनको मातामहः।

सीता ॥ सहर्षकरुणाद्भुतं विलोक्य ॥ कधं तादो (४)।

कुशलवौ ॥ हा तात, हा अम्ब, हा मातामह।

---

(१)। जीवितास्मि।

(२)। वत्स ईदृशोऽपि चिरञ्जीव।

(३)। कुत्र तौ पुत्रकौ मे।

(४)। कथं तातः।

रामलक्ष्मणौ॥ सहर्षमालिङ्ग्य॥ ननु वत्सौ,पुण्यैः प्राप्ता स्थः।

सीता। एहि जाद,कुश, एहि जाद लव,चिरस्स परिव्वजध पुणो जम्मन्तरगदं जणणिं (१)।

कुमारौ॥ तथा कृत्वा॥ धन्यौ स्वः।

सीता। भअवं पणमामि (२)।

वाल्मी० ईदृश्येव चिरं भूयाः।

सीता। अह्महे तादो, कुलगुरू, अज्जाअणो, सभत्तुका अज्जा सान्ता देवी, सलक्खणा सुप्पसण्णा अज्जउत्तचलणा,समं कुसलवावि दीसन्ति, ता णिब्भरह्मि आणन्देण (३)।

॥ नेपथ्ये कलकलः ॥

वाल्मी॥ उत्थायालोक्य च॥ उपहतलवणो मधुरेश्वरः प्राप्तः।

लक्ष्म। सानुषङ्गानि कल्याणानि।

---

(१) एहि जात कुश, एहि जात लव, चिरस्य परिष्वजस्व पुनर्जन्मान्तरगतां जननीं।

(२) भगवन् प्रणमामि।

(३) तातः कुलगुरुः,आर्य्याजनः, सभर्तृका, आर्य्या शान्ता देवी,सलक्ष्मणाः सुप्रसन्ना आर्य्यपुत्रचरणाः समं कुशलवावपि दृश्यते, तन्निर्भरास्मि आनन्दे।

रामः। सर्व्वमिदमनुभवन्नपि न प्रत्येमि॥ यद्वा॥ प्रकृतिरियमभ्युदयानां।

वाल्मी। रामभद्र उच्यतां, भूयः किन्ते प्रियमुपकरोमि।

रामः। अतः परमपि प्रियमस्ति तथापीदमस्तु;

पाप्मभ्यश्च पुनाति, वर्द्धयति च श्रेयांसि, येयं कथा,
मङ्गल्या च मनोहरा च जगतो मातेव गङ्गेव च;
तामेतां परिभावयन्त्वभिनयैर्विन्यस्तरूपाबुधाः,
शब्दब्रह्मविदः कवेः परिणतप्रज्ञस्य वाणीमिमां।

॥ इति निष्क्रान्ताः सर्व्वे॥

॥ गर्भोनाम सप्तमोऽङ्कः समाप्तः॥